कक्षा
12

# विजेत्री

## ( संस्कृतसाहित्यम् )



द्वादशकक्षायै संस्कृतस्य पाठ्यपुस्तकम्

माध्यमिक शिक्षा बोर्ड, राजस्थान, अजमेर

# धन्या मरुभूमिरियम्





# विजेत्री

## ( संस्कृतसाहित्यम् )

( माध्यमिक शिक्षाबोर्ड, राजस्थानेन निर्धारित-पाठ्यक्रममनुसृत्य
द्वादशकक्षायै संस्कृतस्य पाठ्यपुस्तकम् )

माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर

# पाठ्य पुस्तक निर्माण समिति

# विजेत्री

**( संस्कृतसाहित्यम् )**

**( द्वादशकक्षायै संस्कृतस्य पाठ्यपुस्तकम् )**


**संयोजकः सम्पादकश्च**

**डॉ. राजेश जोशी**

प्राध्यापकः, संस्कृतविभागः,

श्री गोविन्द गुरु राजकीय महाविद्यालयः, बाँसवाडा

**सदस्या :**

**डॉ. धनञ्जयकुमारसिंहः**

प्राध्यापकः, संस्कृतविभागः, राजकीय महाविद्यालयः, अलवर

**डॉ. गीताराम शर्मा**

प्राध्यापकः, संस्कृतविभागः, राजकीय कला महाविद्यालयः, कोटा

**डॉ. लता शर्मा**

प्राध्यापिका, संस्कृतविभागः, राजकीय कन्या महाविद्यालयः, अलवरम्

**डॉ. अवधेश कुमार शर्मा**

प्राध्यापकः, संस्कृतविभागः, राजकीय कला महाविद्यालयः, चिमनपुरा

**श्री सत्यनारायण कुमावतः**

प्रधानाचार्यः,

राजकीय उच्च-माध्यमिक-विद्यालयः बोरड़ा बावरियान्, शाहपुरा (भीलवाड़ा)

## पाठ्यक्रम समिति

# विजेत्री

**( संस्कृतसाहित्यम् )**

**( द्वादशकक्षायै संस्कृतस्य पाठ्यपुस्तकम् )**


**संयोजक :** **डॉ. धनंजय कुमार सिंह**
व्याख्याता, बाबू शोभाराम राजकीय कला महाविद्यालय
अलवर-301 001

**लेखकगण :**

1. **श्री अरविन्द कुमार पारीक**
   व्याख्याता, राजकीय उच्च माध्यमिक विद्यालय
   किशनगढ़-अजमेर

2. **श्री वेद प्रकाश कुर्मी**
   प्रधानाध्यापक, राजकीय उच्च माध्यमिक विद्यालय
   भासू, तहसील-टोडाराय (टोंक)

3. **श्री इन्द्र कुमार उपाध्याय**
   प्रधानाध्यापक, राजकीय उच्च प्राथमिक संस्कृत विद्यालय
   रूपाहेडीकला, तहसील-कोट खावदा (जयपुर)

4. **श्री रुद्रेश कुमार दाधीच**
   व्याख्याता, डाईट, बून्दी-323001

# दो शब्द

विद्यार्थी के लिए पाठ्यपुस्तक क्रमबद्ध अध्ययन, पुष्टीकरण, समीक्षा और आगामी अध्ययन का आधार होती है। विषय-वस्तु और शिक्षण-विधि की दृष्टि से विद्यालयी पाठ्यपुस्तक का स्तर अत्यन्त महत्त्वपूर्ण हो जाता है। पाठ्यपुस्तकों को कभी जड़ या महिमामण्डित करने वाली नहीं बनने दी जानी चाहिए। पाठ्यपुस्तक आज भी शिक्षण-अधिगम-प्रक्रिया का एक अनिवार्य उपकरण बनी हुई है, जिसकी हम उपेक्षा नहीं कर सकते।

पिछले कुछ वर्षों में माध्यमिक शिक्षा बोर्ड के पाठ्यक्रम में राजस्थान की भाषागत एवं सांस्कृतिक स्थितियों के प्रतिनिधित्व का अभाव महसूस किया जा रहा था, इसे दृष्टिगत रखते हुए राज्य सरकार द्वारा कक्षा-9 से 12 के विद्यार्थियों के लिए माध्यमिक शिक्षा बोर्ड, राजस्थान द्वारा अपना पाठ्यक्रम लागू करने का निर्णय लिया गया है। इसी के अनुरूप बोर्ड द्वारा शिक्षण सत्र 2016-17 से कक्षा-9 व 11 तथा सत्र 2017-18 से कक्षा-10 व 12 की पाठ्यपुस्तकें बोर्ड के निर्धारित पाठ्यक्रम के आधार पर ही तैयार कराई गई हैं। आशा है कि ये पुस्तकें विद्यार्थियों में मौलिक सोच, चिंतन एवं अभिव्यक्ति के अवसर प्रदान करेंगी।

**प्रो. बी.एल. चौधरी**
अध्यक्ष
माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर

# प्राक्कथनम्

संस्कृतस्य नवीन पुस्तकमिदं माध्यमिक-शिक्षा-बोर्ड-राजस्थानस्य द्वादशकक्षायै ऐच्छिक-संस्कृतविषयस्य निर्धारितपाठ्यक्रममनुसृत्य सम्पादितमस्ति। पुस्तक-प्रस्तुतौ बोर्ड-निर्देशित-मानदण्डानां लक्ष्यानाञ्च पूर्त्यर्थं सम्पादकमण्डलेन सर्वथा प्रयतितम्। छात्राणां सौविध्याय पुस्तकेऽस्मिन् छन्दोऽलङ्कारा:-पद्य-गद्य-नाट्य-संस्कृतसाहित्येतिहास:-व्याकरणं-रचनाकार्यञ्च एकत्रैव समावेशिता:। पुस्तके पञ्च भागा: विद्यन्ते-

प्रथमो खण्ड: प्राचीनार्वाचीन संस्कृतसाहित्यस्य प्रमुखसङ्कलितपाठात्मक:। अत्र प्राचीनसन्दर्भे वेदोपनिषद: आरभ्य साम्प्रतिक-लोकप्रियाणां रचनानां, शिक्षाप्रदानां मनोरञ्जकानाञ्च अंशानां सङ्कलनम् अस्ति।

संस्कृतस्य नूतनपुस्तकेऽस्मिन् चतुर्दशपाठेषु एकादश पाठा: प्राचीनरचनाकाराणां पश्चाच्च चत्वार: पाठा: आधुनिकरचनाकाराणां सन्ति। एतेषु चतुर्दश पाठेषु वेदसम्मतयोगक्षेमकामना, गुरूपदेशमहिमा, मानवधर्म:, कर्मयोग-भक्तियोग-आत्मसंयमयोगस्य च महान् शिक्षा, गोसंरक्षणं, यक्ष-युधिष्ठिरसंवादमाध्यमेन तात्त्विकचर्चा, सहकारभावना, देशभक्ति वन्दना, रामचन्द्रस्य कारुण्यं, राजनीते:-उपायचतुष्टयस्य, विविधकर्तव्याकर्तव्यभावनादीनां च जीवनोपयोगिशिक्षाप्रदानां प्रस्तुतिरत्र सञ्जाता।

एतेषां पाठानां पठनेन छात्रेषु भाषाकौशलविकासेन सह भारतीयसंस्कृते शाश्वतभावानाम् अपि विकासो भविष्यति। येन सम्प्रेरितास्ते सदैव कर्तव्यनिष्ठया मनोयोगेन च कार्यं कुर्वन्त: शोभना: नागरिका: भविष्यन्ति। राष्ट्रनिर्माणे च स्वकीयं योगदानं करिष्यन्ति।

द्वितीयो खण्ड: छन्दोऽलङ्कारपरिचयात्मक:। पुस्तकस्य द्वितीय: खण्डेऽस्मिन् प्रमुखछन्दसामलङ्काराणाञ्च लक्षणोदाहराणि च प्रदत्तानि।

तृतीय: खण्ड: संस्कृत-साहित्यस्य इतिहासभागेन सम्बद्ध: अस्ति। अत: अत्र वैदिकसाहित्यस्य विवेचनं पश्चाच्च लौकिकसाहित्यविवेचनं विहितम्। लौकिकसाहित्येऽपि गद्य-नाटक-उपन्यास-कथादीनां प्रमुखकृतीनां ऐतिहासिकेतिवृत्तविवेचनपुरस्सरं राजस्थानीयार्वाचीनसाहित्यकाराणां विवेचनं प्रस्तुतीकृतम्।

चतुर्थ: खण्ड: व्याकरणात्मक: अस्ति। व्याकरणं नाम साधुत्वासाधुत्वबोधकं शास्त्रम्। विशेषत: भाषाज्ञानाय व्याकरणं लघुतमं सरलतमं परिष्कृततमं च साधनम्। तत्रापि

मुख्यत: संस्कृतभाषाया: अध्ययनाय व्याकरणस्य ज्ञानं नितान्तमावश्यकम्। अत्र सन्धि-समास-कारकादीनाञ्च सामान्यज्ञानं विहितमस्ति।

पञ्चम खण्डे छात्राणां रचनाकौशलं वर्द्धनाय प्रदत्तरूपरेखया कथासंयोजनं, क्रमसंयोजनं, सङ्केताधारित-वर्णनं, अनुवादकार्यञ्च विहितमस्ति।

पञ्चस्सु अपि खण्डेषु प्रतिखण्डं भाषा सरला-सरसा च स्यात् इति सावचेतोभि: अस्माभि: प्रयतितम्। विषयबोधाय प्रतिपद्यं अन्वय:, कठिनशब्दार्था:, इत्यादय: प्रदत्ता: सन्ति, येन छात्र: अन्यसाहाय्यं विना संस्कृतेन एव संस्कृतभाषां पठितुं क्षम: स्यात्। अधीतज्ञानपरीक्षणाय च पाठान्ते वस्तुनिष्ठप्रश्ना:, अतिलघूत्तरात्मक-प्रश्ना:, लघूत्तरात्मक-प्रश्ना:, निबन्धात्मकप्रश्ना:, व्याकरणप्रश्नाश्च सन्निवेशिता: सन्ति।

एवं छात्राणां संस्कृतसाहित्यस्य सम्यग्बोधाय ज्ञानस्य दीपमालया दीपितस्य संस्कृतिसुषमया च सुशोभितस्य पाठयपुस्तकस्याध्ययनं मननं चिन्तनं चावश्यकम्।।

पुस्तकेऽस्मिन् माध्यमिकशिक्षाबोर्डराजस्थानस्य निर्देशानामुद्देश्यानाञ्च पूर्तये पूर्ण: प्रयासो विहित:। पुस्तकनिर्माणे सततजागरूका: विद्वज्जना: डॉ. धनञ्जयकुमारसिंह (अलवर), डॉ. गीतारामशर्मा (कोटा), डॉ. लताशर्मा (अलवर), डॉ. अवधेशर्मा (जयपुर), श्री सत्यनारायणकुमावत (शाहपुरा) आदय: धन्यवादार्हा: सन्ति। अस्माकं प्रयासोऽयं यद् पुस्तकमधीत्य विद्यार्थिनां विषयज्ञानं भाषाबोधश्च सुदृढतर: स्यात्।

**डॉ. राजेश जोशी (बाँसवाडा)**
संयोजक:

❀ ❀ ❀

# संस्कृतम् पाठ्यक्रम : कक्षा-12

**समय :** 3:15 होरा: **पूर्णांक :** 80

| क्र.सं. | अधिगम क्षेत्र | अंकभार |
|---|---|---|
| 1. | पठितावबोधनम् | 30 |
| 2. | विषयवस्तु (संस्कृतसाहित्यस्य इतिहास:) | 10 |
| 3. | छन्दोऽलंकारा: (छन्दोऽलंकारा:) | 10 |
| 4. | अपिठतांशवबोधनम् | 08 |
| 5. | रचनात्मकार्यम् | 10 |
| 6. | व्याकरणम् | 12 |

**पठितावबोधनम्** **30**

**(अ) (पद्यांश-गद्यांश-नाट्यांशेभ्य:)** 24

अंशत्रयेषु उत्तरम्/पूर्णवाक्येन उत्तरम्/विशेषण-विशेष्य-प्रयोग:/अन्विति:/ विलोम-चयनम्/पर्याय-चयनम्/कर्तृक्रियापद-चयनम्/शब्दार्था: कथनानि आश्रित्य प्रश्न-निर्माणम् भावार्थ-लेखनम्/अन्वय-लेखनम्

**(ब) पाठ्यपुस्तकाधारितं भाषिक-कार्यम्** 06

(i) कर्तृ-क्रियापदचयनम् (ii) विशेषण-विशेष्य-चयनम्

(iii) सर्वनाम-संज्ञा-प्रयोग: (iv) समान-विलोम-पदचयनम् (v) क: कं कथयति।

**2. संस्कृत-साहित्योतिहास:** **10**

**3. छन्दोऽलंकार परिचय:** **10**

**(क) छन्द: परिचय:** 05

छन्द: लघुयुक्तविवेक:

छन्द: अधोलिखित-छन्दसां सोदाहरणलक्षणसामान्यज्ञानम्

छन्दांसि-अनुष्टुप्, उपजाति:, वंशस्थ:, वसन्ततिलका, मालिनी, शिखरिणी, शार्दूल-विक्रीडितम्, मन्दाकान्ता

**(ख) अलंङ्कारा** 05

(i) शब्दालङ्कारा: - अनुप्रास:, यमकम्, श्लेष:

(ii) अर्थालङ्कारा: - उपमा, रूपकम्, उत्प्रेक्षा, अर्थान्तरन्यास:
प्रदत्तश्लोकेषु अलंकारस्य अभिज्ञानमाध्यमेन, प्रदत्त-परिभाषासु रिक्तस्थानपूर्ति-माध्यमेन च परीक्षणम्।

**4. अपठितावबोधनम्** **08**

(1) 40-60 शब्दपरिमित: एक: सरल: अपठित: गद्यांश: प्रश्नवैविध्यम्

(i) एकपदेन उत्तरम्

(ii) पूर्ण-वाक्येन उत्तरम्

(iii) भाषिक-कार्यम् - कर्तृक्रियापदचयनम्, सर्वनामसंज्ञापद-चयनम्
विशेषण-विशेष्य-चयनम्/समानार्थक-विलोमपदचयम्/

80-100 शब्द परिमितः एकः सरलः अपठितः गद्यांशः

(सम्पादितः सरलः साहित्यिकः अंशः)

**प्रश्नवैविध्यम्**

(i) एकपदेन उत्तरम् (प्रश्नद्वयम्)

(ii) पूर्ण-वाक्येन उत्तरम् (एकप्रश्नः)

भाषा सम्बद्धकार्यम्

(i) कर्तृ-क्रियापदचयनम्

(ii) विशेषण-विशेष्य-प्रयोगाः
सर्वनाम-प्रयोगाः/संज्ञाप्रयोगाः
शब्दार्थचयनम्/विलोमचयम्/ समुचित्शीर्षकप्रदानम्

**(5) रचनात्मक कार्यम्** **10**

प्रदत्तरूपरेखया कथासंयोजनम्/क्रमयोजनम्

(i) संकेताधारित वर्णनम् 05

(ii) अनुवादकार्यम् 05

**(6) व्याकरणम्** **12**

(i) स्वरसन्धिः (प्रमुख सूत्राणि उदाहरणानि च प्रयोगाः लघुसिद्धान्तकौमुद्यानुसारम्) 04

(ii) कारकम् - उपपदविभक्तीनाम् प्रयोगाः तेषां सामान्य प्रश्नाः 04

(iii) समासः - वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां समासः 04
(अव्ययीभावः, कर्मधारयः, द्वन्द्वः बहुब्रीहिश्च)

## कक्षा-12 (पाठ्यपुस्तक-पाठ संकेतः)

**(अ)** 1. मङ्गलाचरम् ईशवन्दना

2. गुरुमहिमा (शुकनासोपदेशयतु)

3. संस्कार-परिचयः (मनुस्मृति ग्रन्थानुसारः)

4. गीतामृतम् - (श्रीमद्भगवद्गीतः कर्मयोगः भक्ति)
योगात्मस्वरूपस्य आधारिताः दशश्लोकाः।

5. मृच्छकटिकम् (नाट्यांशः)

6. गीतिकाव्यमरसामृतम् (मेघदूतात् सूक्तियुक्तपद्यानि)

7. दिलीप-नन्दिनीकथा (रघुवंशात)

8. कथा-देवर्षिकलानाथशास्त्रीकृत कथावल्लरीतः एककथा।

9. महाकविमाघः (व्यक्तित्वं कृतित्वं च)

10. यक्ष-प्रश्नाः (महाभारतात्)

11. करालकुट्टिनीकथा (पंचातन्त्रात्)

12. आधुनिक-रचनाकारस्य अभिनव-निबन्धः।

13. भारत-गौरवम् (डॉ. रमाकान्तशुक्लमहोदयेन विरचितात् 'भाति मे भारतम्' काव्यात्)

14. उत्तररामचरितम् - (उक्तग्रन्थात् छायाङ्कः)

**खण्ड-ब**

**छन्दोऽलङ्कारः**

**छन्दसां परिचयः उदाहरणं च।**

(1) लघुयुक्त-विवकेः

(2) अधोलिखितछन्दसां सोदाहरण-लक्षण-सामान्य-ज्ञानम्-छन्दांसि-अनुष्टुप्, उपजातिः, वंशस्थः, वसन्ततिलका, मालिनी, शिखरिणी, शार्दूलविक्रीडितम्, मन्दाक्रान्ता

अलङ्‌काराः -

अलङ्‌काराः परिचयः सोदाहरणम्।

उपमा रूपकम्, उत्प्रेक्षा, अर्थान्तरन्यासः,

**खण्ड-स**

संस्कृतसहित्येतिहासः

संस्कृत-साहित्यस्य परिचयात्मकः इतिहासः, वैदिकः लौकिकश्च।

**खण्ड-द**

(1) प्रदत्त-रूपरेखया कथा-संयोजनम्/क्रमायोजनम्/संकेताधारित-वर्णनम्।

(2) अनुवादकार्यम्

**खण्ड-च**

**व्याकरणम -**

स्वरसन्धिः, कारकम्, समासाः च।

प्रमुख-सूत्राणांम् विवेचनम्, उदाहरणं च।

# अनुक्रमणिका


प्राक्कथनम्

## ( प्रथमः खण्डः )

| | | | | |
|---|---|---|---|---|
| प्रथमः पाठः | मङ्गलाचरणम् | – | वेदोपनिषत्तः | ................ 1 |
| द्वितीयः पाठः | गुरूपदेशः | – | कादम्बरीतः | ................ 7 |
| तृतीयः पाठः | मानवधर्मः | – | मनुस्मृतेः | ...............17 |
| चतुर्थः पाठः | गीतामृतम् | – | श्रीमद्भगवद्गीतातः | ...............26 |
| पञ्चमः पाठः | मेघदूतपीयूषम् | – | मेघदूतात् | ...............35 |
| षष्ठः पाठः | चारुत्वं चारुदत्तस्य | – | मृच्छकटिकात् | ...............47 |
| सप्तमः पाठः | नन्दिनीकथा | – | रघुवंशात् | ...............59 |
| अष्टमः पाठः | यक्ष-युधिष्ठिरयोः संवादः | – | महाभारतात् | ...............73 |
| नवमः पाठः | महाकविः माघः | – | सङ्कलितः | .............. 80 |
| दशमः पाठः | कारुण्यं रामभद्रस्य | – | उत्तररामचरितात् | ............... 86 |
| एकादशः पाठः | नीत्या स्वकार्यं साधनीयम् | – | पञ्चतन्त्रात् | ................97 |
| द्वादशः पाठः | मातृवन्दना-गीतिः | – | मधुच्छन्दातः | ..............103 |
| त्रयोदशः पाठः | सङ्घे शक्तिः | – | प्रबन्धमकरन्दतः | ..............110 |
| चतुर्दशः पाठः | पितामही मिलिता | – | लघुकथासंग्रहात् | ..............116 |

## ( द्वितीयः खण्डः )

( क ) अलंकारपरिचयः – 122 - 129

१. अनुप्रासः

२. यमकम्

३. श्लेषः
४. उपमा
५. उत्प्रेक्षा
६. रूपकम्
७. अर्थाऽन्तरन्यासः
८. विभावना
९. विशेषोक्तिः
१०. निदर्शना

**( क ) छन्दोज्ञानम्–** 130 - 138

१. इन्द्रवज्रा
२. शालिनी
३. भुजङ्गप्रयातम्
४. द्रुतविलम्बितम्
५. वसन्ततिलका
६. हरिणी
७. शिखरिणी
८. मन्दाक्रान्ता
९. शार्दूलविक्रीडितम्
१०. स्रग्धरा

**( तृतीयः खण्डः ) संस्कृतसाहित्येतिहासः–** 139-185

(अ) वैदिकसाहित्यम् 139 - 152
(ब) लौकिकसाहित्यम्–
(क) नाटकानि 153-159
(ख) गद्यकाव्यानि 160-170
(ग) राजस्थानस्य अर्वाचीनसाहित्यकाराः 171-185

**( चतुर्थः खण्डः ) व्याकरणम्–** 186-217

(क) सन्धिप्रकरणम् ...................... 188-197
(ख) समासप्रकरणम् ....................... 198-204
(ग) कारकप्रकरणम् ......................... 205-217

**( पञ्चमः खण्डः )** 218-224

१. रचनाकार्यम्– प्रदत्तरूपरेखया कथासंयोजनम्/ क्रमयोजनम्/ सङ्केताधारित वर्णनम्।
२. अनुवाद कार्यम्। 221

# प्रथमः खण्डः

## प्रथमः पाठः
## मङ्गलाचरणम्

वेदोपनिषत्तः

अस्माकं भारतीयसंस्कृतिः मङ्गलमयी अस्ति। अत्र सर्वेषां कार्याणां निर्विघ्नसमाप्तये मङ्गलाचरणं भवति। अत एव अध्यापने संलग्नानां गुरूणाम्, अध्ययने तल्लीनां छात्राणां मङ्गलकारिमन्त्राणां ज्ञानाय स्मरणाय च मङ्गलाचरणपाठः अत्र प्रस्तुतः।

प्रथमः मन्त्रः ऋग्वेदस्य प्रथममण्डलस्य प्रथमसूक्तात् उद्धृतः अस्ति। अस्मिन् मन्त्रे ऋषिः विश्वामित्रः हविदातृ-यजमानाय कल्याणार्थं अग्निदेवं प्रार्थयति। अस्य मन्त्रस्य ऋषिः विश्वामित्रः, देवता अग्निः छन्दश्च गायत्री।

द्वितीयः मन्त्रः ऋग्वेदस्य दशमण्डलस्य संज्ञान सूक्तात् (१९१ सूक्तम्) उद्धृतः अस्ति। अस्मिन् मन्त्रे ऋषिः संवननः सर्वजनानां मध्ये सहकारभावनायाः विकासार्थं परस्परविरोधनिराकरणार्थं च आवाहनं करोति। तृतीयः मन्त्र ऐतरेयोपनिषदः शान्तिपाठात् उद्धृतः अस्ति। अस्मिन् मन्त्रे सर्वविघ्नानां शान्तये परमात्मा प्रार्थितः। वाङ्मनसोरेकरूपता भवतु-इति कामना च कृता।

चतुर्थः मन्त्रः तैत्तिरीयोपनिषदः शिक्षावल्याः द्वादशानुवाकतः उद्धृतः अस्ति। अयं मन्त्रः ऋग्वेदस्य १/९ मण्डले, यजुर्वेदस्य ३६/९ स्थले अथर्ववेदस्य १९/ ९/ ६ स्थलेऽपि उल्लिखितः अस्ति। अत्र प्रार्थना अस्ति यत् परमेश्वरः कल्याणं करोतु। गुरुशिष्याणां लक्ष्यप्राप्तौ निर्विघ्नतां करोतु।

पञ्चमो मन्त्रः कठोपनिषदः शान्तिपाठात् सङ्कलितः अस्ति। अत्र सहकारभावनया सह उत्कृष्टसामर्थ्यप्राप्तेः अपि कामना अस्ति।

१. यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि ।
त्वेत्तत्सत्यमङ्गिरः ।। (ऋग्वेदस्य प्रथममण्डलस्य अग्निसूक्तात्)

२. संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।। (ऋग्वेदस्य दशमण्डलस्य संज्ञान सूक्तात्)

३. ॐ वाङ्. मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्मे एधि।
वेदस्य मे आणीस्थः श्रुतं मे मा प्रहासीः। अनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि।
सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारमवतु वक्तारम्।
(ऐतरेयोपनिषदः शान्तिपाठात्)

४. ॐ शं नो मित्रः वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पति :।
शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं
ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु
माम्। अवतु वक्तारम्। (ऋग्वेदः १/ ९० / ९ तैत्तिरीयोपनिषदः)

५. ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा
विद्विषावहै। ॐ शान्तिः। शान्तिः।। शान्तिः।। – (कठोपनिषदः शान्तिपाठात्)

❀ ❀ ❀

## अन्वयः –

१. अङ्ग अग्ने। यत् त्वम् दाशुषे भद्रम् करिष्यसि, तव तत् इत्। अङ्गिरः सत्यम्।

२. यथा पूर्वे सञ्जानाना देवाः भागं उपासते (तथा यूयम्) संगच्छध्वं, संवदध्वं, वः मनांसि सञ्जानताम्।

३. ॐ मे वाक् मनसि प्रतिष्ठिता, मे मनः वाचि प्रतिष्ठितम् आविः मे आवीः एधि। मे वेदस्य आणीस्थः मे श्रुतं मा प्रहासीः। अनेन अधीतेन अहोरात्रान् संदधामि ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। वक्तारम् अवतु।

४. ॐ नः मित्रः वरूणः शम्। अर्यमा नः शम् भवतु। नः इन्द्रः शम् बृहस्पतिः (शम् भवतु) उरुक्रमः विष्णुः नः (शं भवतु)। ब्रह्मणे नमः। वायो ते नमः। त्वम् एव प्रत्यक्षं ब्रह्म असि। त्वाम् एव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तत् माम् अवतु। तत् वक्तारम् अवतु। अवतु माम्। अवतु वक्तारम्।

५. ॐ नौ सह अवतु। नौ सह भुनक्तु। सह वीर्यं करवावहै।
नौ अधीतम् (ज्ञानम्) तेजस्वि अस्तु (भवतु)। मा विद्विषावहै।
ॐ शान्तिः शान्तिः शान्तिः।

## शब्दार्थाः

| | | |
|---|---|---|
| **दाशुषे** | = | हविदातृयजमानाय (हवि का दान करने वाले यजमान के लिए) |
| **भद्रम्** | = | कल्याणकारिपदार्थः |
| **अङ्ग अग्ने** | = | हे अग्नि देव |
| **अङ्गिरः** | = | ऋषि विशेषः (अङ्गारमुनि को जन्म देने वाले अग्नि देव) |
| **तत्** | = | तत्कल्याणकारिसर्वपदार्थं (वे सत् कल्याणकारी पदार्थ) |
| **पूर्वे** | = | पूर्वस्य (पहले के) |
| **सञ्जानाना** | = | सम्यक् प्रकारेण ज्ञात्वा (अच्छी प्रकार से जानते हुए) |
| **भागम्** | = | स्वकीयांशम् (अपने अंश को) |
| **उपासते** | = | स्वीकारं कुर्वन्ति (स्वीकार करते हैं) |
| **संगच्छध्वं** | = | सहैव गन्तव्यम् (साथ मिलकर चलो) |
| **संवदध्वं** | = | सहैव वक्तव्यम् (साथ मिलकर बोलो) |
| **मनांसि** | = | चित्तेषु (विचार अथवा चिन्तन, चित्त) |
| **सञ्ज्ञानताम्** | = | विज्ञानताम् (ठीक प्रकार से जाने ) |
| **ॐ** | = | हे सच्चिदानन्द परमात्मन् |
| **प्रतिष्ठिता** | = | स्थिता |
| **वाचि** | = | वागिन्द्रिये, वाण्याम् |
| **प्रतिष्ठितम्** | = | सुस्थितं भवतु |
| **आविः** | = | हे प्रकाशस्वरूप परमेश्वर |
| **आवीः एधिः** | = | त्वं प्रकटितो भव |
| **वेदस्य** | = | ज्ञानस्य |
| **आणीस्थः** | = | आनयकारौ भवताम् |
| **श्रुतम्** | = | आकर्णितं ज्ञानम् |
| **मा प्रहासीः** | = | मा त्यज |
| **अनेन अधीतेन** | = | एतेन अध्ययनेन |
| **अहोरात्रान्** | = | रात्रिन्दिवम् |
| **संदधामि** | = | एवं करवाणि |
| **ऋतं** | = | श्रेष्ठशब्दवृन्दम् एव |
| **वदिष्यामि** | = | कथयिष्यामि |
| **सत्यं वदिष्यामि** | = | यथार्थं कथयिष्यामि |
| **तत्** | = | ब्रह्म |

| | | |
|---|---|---|
| **माम् अवतु** | = | मां रक्षतु |
| **वक्तारम् अवतु** | = | आचार्यं रक्षतु |
| **नः** | = | अस्मभ्यम् |
| **मित्रः** | = | (दिवसप्राणाधिष्ठाता च) मित्रदेवता |
| **शम्** | = | कल्याणप्रदः भवतु |
| **अर्यमा** | = | चक्षुः सूर्यमण्डलस्य च अधिष्ठाता |
| **शं भवतु** | = | कल्याणप्रदं भवतु |
| **बृहस्पतिः** | = | वाग्बुद्ध्यधिष्ठाता |
| **उरुक्रमः** | = | त्रिविक्रमरूपेण पदाधिष्ठाता विष्णुः |
| **ब्रह्मणे** | = | परमात्मस्वरूपिणे |
| **त्वम् एव प्रत्यक्षम्** | = | प्राणरूपेण ज्ञायमानं ब्रह्म अस्ति |
| **तत्** | = | ब्रह्म (सर्वशक्तिसम्पन्नः परमेश्वरः) |
| **माम् अवतु** | = | मम रक्षां करोतु |
| **अवतु वक्तारम्** | = | आचार्यस्य रक्षां करोतु। शान्तिस्वरूप परमेश्वर त्रिविधतापान् शमयतु |
| **नौ** | = | आवयोः, गुरुशिष्ययोः |
| **सह अवतु** | = | सहैव रक्षां करोतु |
| **भुनक्तु** | = | पालनं करोतु |
| **वीर्यं** | = | शक्तिम् |
| **करवावहै** | = | आप्नुयाव, प्राप्तं करवाव |
| **अधीतम्** | = | पठितम् (ज्ञानम्) |
| **मा विद्विषावहै** | = | आवां परस्परं द्वेषं न करवाव |
| **शान्तिः शान्तिः शान्तिः** | = | आधिभौतिक-आधिदैविक-आध्यात्मिक विघ्नानां निवृत्तिः भवतु इत्याशयेन शान्तिपदं त्रिवारं प्रोक्तम्। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. अस्य पाठस्य प्रथममन्त्रः कस्माद् ग्रन्थाद् उद्धृतोऽस्ति –
(क) ऐतरेयोपनिषदः शान्तिपाठात् (ख) तैत्तिरीयोपनिषदः शान्तिपाठात्
(ग) कठोपनिषदः शान्तिपाठात् (घ) ऋग्वेदस्य प्रथममण्डलतः ( )

२. अस्य पाठस्य प्रथममन्त्रस्य ऋषिः कः अस्ति ?
(क) संवननः (ख) मेधातिथिः
(ग) विश्वामित्रः (घ) अङ्गिरा ( )

३. ओङ्कारपदस्य अर्थः कः ?

(क) मोक्षः (ख) ब्रह्मसेवकः

(ग) सच्चिदानन्दः (घ) अभिषेकः ( )

४. ॐ सह नाववतु वाक्ये 'नौ' पदस्य अर्थः कः?

(क) नावौ (ख) नद्यौ

(ग) शिवरामौ (घ) गुरुशिष्यौ ( )

## अतिलघूत्तरात्मक प्रश्नाः –

१. 'दाशुषे' इत्यस्य पदस्य अर्थः कः ?
२. तेजस्वि किं अस्तु ?
३. अहं किं वदिष्यामि ?
४. त्वमेव कीदृशं ब्रह्मासि ?
५. मम वाणी कुत्र प्रतिष्ठिता भवतु ?

## लघूत्तरात्मक प्रश्नाः –

१. प्रथममन्त्रस्य संस्कृतव्याख्या कर्त्तव्या ?
२. द्वितीयमन्त्रस्य व्याख्या करणीया ?
३. अस्य पाठस्य सारः संक्षेपेण लेखनीयः ?
४. अनेन पाठानुसारेण के कान् च अवन्तु ?

## व्याकरणात्मक प्रश्नाः –

**१. अधोलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धेर्नामपि लेखनीयम् -**

| | सन्धिपदम् | विग्रहः | सन्धिर्नाम |
|---|---|---|---|
| (क) | वाङ्.मे | .................................. | ........................ |
| (ख) | नाववतु | .................................. | ........................ |
| (ग) | तन्मामवतु | .................................. | ........................ |
| (घ) | ब्रह्मासि | .................................. | ........................ |
| (ङ) | तद्वक्तारम् | .................................. | ........................ |

**२. अधोलिखितपदेषु उपसर्ग-प्रकृतिः प्रत्ययश्च लिखत-**

| | पदम् | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|---|
| (क) | प्रतिष्ठिता | ............... | .................. | ..................... |
| (ख) | मनसि | .................. | ................... | .................. |
| (ग) | ब्रह्मणे | .................. | ................... | .................. |

(घ) वक्तारम् .................. .................. ..................
(ङ) अधीतम् .................. .................. ..................
(च) संवदध्वम् .................. .................. ..................

**३. अधोलिखितपदेषु धातुः लकारः पुरुषः वचनञ्च लिखत–**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) एधि | ............ | .............. | .............. | .................... |
| (ख) भवतु | ............ | .............. | .............. | .................... |
| (ग) असि | ............ | .............. | .............. | .................... |
| (घ) भुनक्तु | ............ | .............. | .............. | .................... |
| (ङ) करवावहै | ............ | .............. | .............. | .................... |
| (च) अस्तु | ............ | .............. | .............. | .................... |

**४. निम्नलिखित पदानि प्रयुज्य वाक्यनिर्माणं कर्तव्यम् –**

(क) वाक् – ............................................................................ ।
(ख) भुनक्तु – ............................................................................ ।
(ग) वदिष्यामि – ............................................................................ ।
(घ) अमृतम् – ............................................................................ ।
(ङ) माम् – ............................................................................ ।

**५. निम्नलिखित वाक्येषु वाच्यपरिवर्तनं करणीयम् –**

(क) अहं सत्यं वदिष्यामि = .................................................................।
(ख) वरुणः सर्वान् रक्षति = .................................................................।
(ग) भवान् विद्यालयं गच्छति= .................................................................।
(घ) सः शान्तिं प्राप्नोति = .................................................................।
(ङ) वयं संस्कृतं पठामः = .................................................................।

**वस्तुनिष्ठप्रश्नाः – उत्तरमाला**

१ (क) २. (ग) ३. (ग) ४. (घ)

❀ ❀ ❀

# द्वितीयः पाठः
# गुरूपदेशः

महाकवि–बाणभट्ट प्रणीता 'कादम्बरी' संस्कृतसाहित्यस्य अद्वितीया कथारूपेण प्रथितास्ति। संस्कृतसाहित्ये गद्यसम्राट्–बाणभट्टस्य अपूर्वं वर्णन–विशारदत्वं वीक्ष्य संस्कृत मनीषिणः मन्त्रमुग्धत्वं अनुभवन्ति। महाकवेः बाणभट्टस्य गद्यवर्णने रचनाकौशलत्वं वस्तुवर्णनं प्रकृतिवर्णनं भावगाम्भीर्यं च अपूर्वाऽछटा विद्यते। अतो विषयेऽस्मिन् प्रसिद्धाः एषाः सूक्तयः – 'बाणोच्छिष्टं जगत्सर्वं', 'बाणः कवीनामिह चक्रवर्ती', 'वाणी बाणो बभूव ह', 'बाणस्तु पंचाननः', 'हृदयवसतिः पंचबाणस्तु बाणः'।

सम्राजः हर्षवर्द्धनस्य (६०६ ईस्वीतः ६४८ ईस्वीपर्यन्त) राजसभायाम् आश्रित कविरूपेण तेन हर्षचरितं कादम्बरी चेति ग्रन्थद्वयं विरचितम्। महाकवेः बाणभट्टस्य कादम्बरी हर्षचरितञ्च द्वे प्रख्याते काव्ये स्तः। हर्षचरितमाख्यायिका कादम्बरी कल्पितकथा चास्ति। 'कादम्बरी' सर्वोत्कृष्टं गद्यकाव्यमस्ति। काव्येऽस्मिन् चन्द्रापीड–कादम्बर्याः, पुण्डरीक–महाश्वेतायाश्च प्रणयकथा वर्णितास्ति।

'गुरूपदेशः' पाठः कादम्बर्याः 'शुकनासोपदेशः' नामकगद्यखण्डात् गृहीतः। अस्मिन् खण्डे राजकुमारः चन्द्रापीडः गुर्वाश्रमे ब्रह्मचर्यावस्थां समाप्य पिता तारापीडस्य राजप्रासादे पुनरागतः। राज्ञः तारापीडस्य महामन्त्री शुकनासः सत्व–शौर्य–आर्जव भावसम्पन्नं तं चन्द्रापीडं अधिकतरं गुणातिशायी कर्तुं बहुविधप्रकारैः उपदिशति। अस्मिन् प्रसङ्गे सर्वप्रथमः सः गुरूपदेशस्य महत्त्वं प्रतिपादयति।

वस्तुतः गुरोः ज्ञानम् अमूल्यं भवति। यः शिष्यः गुरुकुले निवसन् भक्तिभावेन विद्याध्ययनं करोति, तस्य विद्या अवश्यमेव सफला भवति। अद्यत्वे अस्माकं समाजे तादृशगुरुकुलानाम् अभावः एव, किन्तु यत्रापि विद्यालयेषु महाविद्यालयेषु वा गुरवः पाठयन्ति, तान् प्रति छात्रैः श्रद्धासेवाभावना वा अवश्यमेव कर्तव्या। अनेनैव विद्यार्थिनां जीवनं अध्ययनं च सफलं भवति। गुरुः ज्ञानप्रकाशेन अज्ञानान्धकारे निपतितस्य शिष्यस्य उद्धारको भवति। शिष्यस्य शारीरिकं, मानसिकं, आध्यात्मिकं, नैतिकञ्च विकासं करोति।

एवं समतिक्रामत्सु केषुचिद्दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरण संभार संग्रहार्थमादिदेश। समुपस्थितयौवराज्याभिषेकं च तं कदाचिद् दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छन् कर्तुं शुकनासः सविस्तरमुवाच –

तात् चन्द्रापीड ! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एवातिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टं परमैश्वर्यतिमिरान्धत्वम्, अतितीव्रोदर्पदाहज्वरोष्मा, विषमो विषयविषास्वादमोहः।



नित्यमस्नानशौचबाध्यो बलवान् रागमलावलेपः। अप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति। विस्तरेणाभिधीयसे ।गर्भेश्वरत्वम् अभिनवयौवनत्वम् अप्रतिरूपत्वम् अमानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा सर्वा। अविनयानाम् एकैकमप्येषामायतनं किमुत् समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

इन्द्रियहरिणहारिणी च सततदुरन्तेयम् उपभोगमृगतृष्णिका। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु।

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः।

गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमानन शोभासमुदयमधिकतरमुपजनयति। हरत्यतिमलिनमन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव। गुरूपदेशः प्रशमहेतुर्वयः परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।

अयमेव चानास्वादितविषयरसस्य ते कालः उपदेशस्य। कुसुमशरप्रहारजर्जरिते हि हृदि जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः श्रुतं चाविनयस्य। चन्दनप्रभवो न दहति किमनलः ? किं वा प्रशमहेतुनापि न प्रचण्डतरी भवति वडवानलो वारिणा ?

गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमम् अजलं स्नानं, अनुपजात-पलिता दिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम्। असुवर्णविरचनम् अग्राम्यं कर्णाभरणं, अतीत ज्योतिरालोकः, नोद्वेगकरः प्रजागरः। विशेषेण तु राज्ञाम्। विरलाः हि तेषामुपदेष्टारः।

प्रतिशब्दक इव राजवचनमनुगच्छति जनो भयात्। उद्दिश्यमानपि ते न शृण्वन्ति। शृण्वन्तोऽपि च खेदयन्ति हितोपदेशवादिनो गुरून्। अहङ्कारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकारीणि धनानि। राजविषविकारतन्द्राप्रदा राजलक्ष्मीः।

## शब्दार्थाः टिप्पणयश्च

**समतिक्रामत्सु** = व्यतीतेषु (व्यतीत होने पर), सम् +अति +क्रम् +शतृ, (सप्तमी, बहुवचन)

**यौवराज्याभिषेकं** = यौवराज्ये अभिषेकः (युवराज के लिये शास्त्रोक्त दृष्टि से कराया जाने वाला स्नान), युवा चासौ राजा, युवराजः (कर्मधारय समास), युवराजस्य भावः यौवराज्यं (युवराज+ष्यञ्)

**चिकीर्षुः** = कर्तुमिच्छुः (करने की इच्छा वाला), कृ + सन् +उ + प्रथमा विभक्तिः, एकवचनम्।

**प्रतीहारान्** = सेवकान् द्वारपालान् वा। द्वितीया, बहुवचन।

**उपकरणसंभार संग्रहार्थम्** = उपकरणानाम् एकीकरणार्थम् (आवश्यक सामग्री–समूह के संग्रह के लिये)

**आरूढविनयमपि** = विनयसम्पन्नं, आरूढः विनयः यस्य सः (बहुव्रीहि) तं, आ + रूह् + क्त
= आरूढः। वि + नी + अप् = विनयः।

**विनीततरमिच्छन्** = अतिशयेन विनीतं कर्तुम् (अपेक्षाकृत अधिक विनीत बनाने की इच्छा से) विनीत +तरप्। इच्छन् = इच्छ् + शतृ।

**विदितवेदितव्यस्य** = विदितं वेदितव्यं यस्य सः (बहुव्रीहि) तं, (जानने योग्य को जान लिया है, जिसने)

**अधीतसर्वशास्त्रस्य** = अधीतानि सर्वाणि शास्त्राणि येन तस्य (जिसने सभी शास्त्र पढ़ लिये हैं, उसके), अधि + ईण् + क्त = अधीत

**नाल्पमप्युपदेष्टव्यमस्ति** = न अल्पम् अपि उपदेष्टव्यम् अस्ति (उपदेश योग्य थोड़ा भी शेष नहीं है), उप + दिश् + तव्यत् = उपदेष्टव्यम्।

**निसर्गतः** = स्वभावेन, प्रकृत्या (स्वभाव से)

**यौवनप्रभवम्** = यूनस्य भावः यौवन, यौवनं प्रभवः यस्य तत् (बहुव्रीहि समास), (यौवन से उत्पन्न)।

**अपरिणामोपशमो** = अन्तिमावस्थायामपि शान्तिः न भवति, परिणामे उपशमः यस्य सः परिणामोपशमः(बहुव्रीहि समास), न परिणामोपशमः (नञ् समास), (समाप्ति में भी शान्त नहीं होने योग्य)।

**दारुणो** = भयंकरः, दृ+णिच्+उनन् = दारुणः (भयानक/भीषण)।

**लक्ष्मीमदः** = लक्ष्म्याः मदः (षष्ठी तत्पुरुष समास), धन का नशा।

**परमैश्वर्यतिमिरान्धत्वम्** = परम् ऐश्वर्यं एव तिमिरम् परमैश्वर्यतिमिर, तेन उत्पन्न अन्धत्वम् (ऐश्वर्यरूपी रतोंधी रोग से उत्पन्न अन्धापन)।

**दर्पदाहज्वरोष्मा** = दर्पदाहज्वरस्य ऊष्मा (षष्ठी तत्पुरुष), घमण्डरूपी दाहक ज्वर से उत्पन्न गर्मी।

**विषयविषास्वादमोहः** = विषयरूपी विष आस्वादात् मोहः (पञ्चमी तत्पुरुष), शब्द, स्पर्श, रूप, रस, गन्धादि विषयों के भोग से उत्पन्न मोह।

**अस्नानशौचबाध्यो** = स्नानशौचाभ्यां वध्यः स्नानशौचवध्यः (पञ्चमी तत्पुरुष), न स्नान शौच वध्यः (नञ् समास), हन् + ण्यत् = वध्यः, (नित्य स्नान और पवित्रता से भी दूर न करने योग्य)।

**रागमलावलेपः** = रागः एव मलं रागमलम् (कर्मधारय), रागमलस्य अवलेपः (षष्ठी तत्पुरुष), रञ्ज् + घञ् = रागः, अव + लिप् + घञ् = अवलेपः (आसक्तिरूपी मैल का लेप)।

**राज्यसुखसन्निपातनिद्रा** = राज्यसुखम् एव सन्निपात निद्रा तद्वत् प्रगाढ़ा निद्रा (कर्मधारय), राज्यसुखरूपी सन्निपात से उत्पन्न गहरी नींद ।

**गर्भेश्वरत्वम्** = गर्भात् ईश्वरत्वम् (पञ्चमी तत्पुरुष), गर्भ से ही स्वामी होना।

**खल्वनर्थपरम्परा** = खलु/निश्चयेन अनर्थानां परम्परा (अनर्थों की कड़ी)।

**अविनयानाम्** = दुष्टानाम् (उद्दण्डताओं का)।

**आयतनम्** = निवास स्थानम् (घर)।

**समवायः** = समूहः ।

**कालुष्यमुपयाति** = कलुषतां प्राप्नोति, कलुषस्य भावः कालुष्यम्, कलुष् + ष्यञ् (कलुषता को प्राप्त हो जाती है अथवा मैली हो जाती है)।

**इन्द्रियहरिणहारिणी** = इन्द्रियाणि इव हरिणाः तान् हरतीति, हृ + णिनि + ङीप् = हारिणी (इन्द्रियरूपी हरिणों को हरने वाली)।

**सततदुरन्तेयम्** = दुःखम् अतः यस्याः सा दुरन्ता, सततदुरन्ता + इयम् (गुण सन्धि), सदा दुःखद परिणाम देने वाली।

**उपभोगमृगतृष्णिका** = उपभोग एव मृगतृष्णिका, (उपभोग रूपी मृगतृष्णा किंवा लालसा) उप् + भुज् + घञ्=उपभोगः।

**दिङ्मोहः** = दिग्भ्रमः, दिशां मोहः वा (दिशाओं का भटकाव) ।

**उन्मार्गप्रवर्तकः** = उन्मार्गे किंवा कुमार्गे प्रवर्तकः, प्र + वृत् + णिच् + ण्वुल् = प्रवर्तकः,
* दिशाओं के विषय में उत्पन्न भ्रम मनुष्य को गलत रास्ते पर ले जाकर नष्ट कर देता है।

| | | |
|---|---|---|
| **स्फटिकमणाविव** | = | स्फटिकश्चासौ मणि: तस्मिन्, स्फटिकमणौ + इव (अयादि) स्फटिक, फटिक अथवा बिल्लौर मणि के समान। |
| **रजनिकरगभस्तयो** | = | रजनिकरस्य गभस्तय: (षष्ठी तत्पुरुष), चन्द्रमा की किरणें। |
| **अभव्यस्य** | = | अशिष्टस्य दुष्टस्य वा, न भव्यस्य (नञ् समास) । |
| **करिण इव** | = | कर: शुण्डादय: अस्य अस्ति इति हस्ति (हाथी के समान) |
| **शङ्खाभरणम्** | = | शङ्खनिर्मितम् आभरणम् आभूषणं वा (मध्यमपदलोपी समास) |
| **हरत्यतिमलिनमन्धकारमिव** | = | हरति अतिमलिनम् अन्धकारम् इव (मलिन अन्धकार की तरह हर लेता है) |
| **प्रदोषसमयनिशाकर** | = | प्रदोषसमये निशाकर: (सन्ध्या अथवा रात्रिकालीन चन्द्रमा) |
| **प्रशमहेतु:** | = | प्रशमस्य हेतु: (षष्ठी तत्पुरुष), शान्ति का हेतु, शान्तिकारक |
| **शिरसिजजालम्** | = | शिरसि जायन्ते इति शिरसिजा: (अलुक् समास), शिरसिजानां जालम् (षष्ठी तत्पुरुष), केशसमूह को । |
| **अमलीकुर्वन्** | = | निर्मल/श्वेत कुर्वन् * काले केशसमूह को श्वेत करते हुए |
| **चानास्वादितविषयरसस्य** | = | च अनास्विादितविषयरसस्य, न आस्वादिता: (नञ् समास) विषयरसा: येन (बहुव्रीहि समास) *जिसने विषयों (भोगों) का रस नहीं चखा है, ऐसे तुम्हारे लिये । |
| **वय: परिणाम:** | = | वयस: परिणाम: (वृद्धावस्था)। |
| **कुसुमशरप्रहारजर्जरिते** | = | कामदेवस्य बाणप्रहारै: जर्जरिते, कुसुमानि एव शरा: यस्य स: कुसुमशर:, तस्य शराणां प्रहारै: आहते (कामदेव के बाणप्रहार से छिदे हुए (हृदय) में)। |
| **गलत्युपदिष्टम्** | = | गलति उपदिष्ट, उपदिष्टं विषयं जलमिव गलति। |
| **दुष्प्रकृते:** | = | दुष्ट प्रकृति: यस्य (बहुव्रीहि), दुर्जन मनुष्य के । |
| **अन्वय:** | = | वंश:, सत्कुल: वा। |
| **वडवानलो** | = | वडवाया: अनल:, समुद्रस्य अग्नि: (समुद्र में स्थित अग्नि) |
| **पुरुषाणामखिलमलप्रक्षालनक्षमम्** | = | मनुष्याणां सम्पूर्ण मल प्रक्षालने समर्थ। |
| **अजलं स्नानम्** | = | विना जलं स्नान, न जलम् इति अजलम् (नञ् समास), गुरूपदेश मनुष्यों के समग्र मैल को धोने में समर्थ बिना जल का स्नान है। |
| **अनुपजात-पलिता** | = | न उपजात (नञ् समास), अनुपजातं पलितादि वैरूप्य, विरूपस्य भाव: वैरूप्य, विरूप् + ष्यञ् *गुरूपदेश बालों की |

सफेदी आदि कुरूपता के उत्पन्न हुए बिना ही बुढ़ापे से रहित बड़प्पन है।

**अनारोपितमेदोदोषम्** = न आरोपित: (नञ् समास) मेद: दोषम् अजरं (जरारहित) वृद्धत्व, न जरम् इति (नञ् समास)। गुरूपदेश चर्बीरूपी दोष बढ़ाए बिना गुरुता (भारीपन) देता है।

**असुवर्णविरचनम्** = न सुवर्णविरचनम् (नञ् समास), स्वर्णरहित सुन्दर आभूषण।

**अतीत ज्योतिरालोक:** = अतीतं ज्योति: यस्मात् स: (बहुव्रीहि), ज्योतिरहित: प्रकाश:, * गुरूपदेश में चमक-दमक नहीं है तथापि वह ऐसा प्रकाश है, जो अज्ञानान्धकार में रहने वाले प्रत्येक विषय का साक्षात्कार करा देता है।

**नोद्वेगकर: प्रजागर:** = न उद्वेगं करोति इति, न + उद्वेगकर: (गुण सन्धि)।

**प्रजागर:** = प्रकृष्ट जागरण: (विशेष जागरण), *सामान्य जागरण होने पर बैचेनी रहती है, किन्तु गुरु का उपदेश बैचेनी उत्पन्न किये बिना ही जगाने वाला है।

**प्रतिशब्दक इव** = शब्दं पश्चात् (अव्ययीभाव), प्रतिशब्द + कन् = प्रतिशब्दक, (प्रतिध्वनि के समान)

**अहंकारदाहज्वरमूर्च्छान्धकारिता** = अहंकार एव दाहज्वर: (कर्मधारय), अहंकारदाहज्वरेण मूर्च्छा (तृतीया तत्पुरुष) तया अन्धकारिता, *जिस प्रकार दाहज्वर से व्यक्ति तड़पता है और उससे उत्पन्न मूर्च्छा से कुछ भी ज्ञान नहीं रहता, ठीक उसी प्रकार अहंकाररूपी दाहज्वर से उत्पन्न मोह से राजा लोग उचितानुचित विवेक को खोकर रात-दिन तड़पते रहते हैं।

**अलीकाभिमानोन्मादकारीणि** = धनानि अलीक (मृषा) अभिमान उन्मादकारिणी भवन्ति।

**अलीक** = झूठा अभिमान अथवा पागलपन।

**राजविषविकारतन्द्राप्रदा** = राज्यम् एव विषम् (कर्मधारय) तस्माद् विकार: (पञ्चमी तत्पुरुष), राज्यविकारेण तन्द्रा, तां प्रकर्षेण ददाति इति। राज्यरूपी जहर से उत्पन्न आलस्य देने वाली।

**राजप्रकृति:** = राज्ञ: प्रकृति:, (षष्ठी तत्पुरुष) स्वभाव: (राजा का स्वभाव)।

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः-

प्र.१ चन्द्रापीडस्य पितुर्नाम किमासीत् ?

(क) शुकनासः (ख) तारापीडः

(ग) बाणभट्टः (घ) शूद्रक ( )

प्र.२ अनर्थपरम्परायां विद्यते विद्यन्ते वा ।

(क) गर्भेश्वरत्वम् (ख) अभिनवयौवनम्

(ग) अप्रतिरूपत्वम् (घ) एतानि सर्वाणि ( )

प्र.३ 'भवादृशाः एव भवन्ति भाजनानि' वाक्येऽस्मिन् 'भवादृशा' कस्य कृते प्रयुक्तः ?

(क) शुकनासस्य कृते (ख) तारापीडस्य कृते

(ग) चन्द्रापीडस्य कृते (घ) सेवाकस्य कृते ( )

प्र.४ 'वडवानलः' कस्याग्निः कथ्यते ?

(क) समुद्रस्य (ख) वनस्य

(ग) गृहस्य (घ) भूगर्भस्य ( )

### रिक्तस्थानपूर्तिः क्रियताम् -

(क) अपरिणामोपशमो दारुणो ....................................... ।

(ख) ........................... च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

(ग) अयमेव चानास्वादितविषयरसस्य ते कालः ..............................।

(घ) विशेषेण तु राज्ञाम्। .............................. हि तेषामुपदेष्टारः।

### अतिलघूत्तरात्मक-प्रश्नाः

प्र.१ निसर्गत एव अतिगहनं तमोबहूलं किम्भवति ?

प्र.२ राज्यसुखसन्निपात निद्रा कीदृशी भवति ?

प्र.३ कस्मिन् मनसि उपदेशगुणाः सुखेन विशन्ति ?

प्र.४ अजलं स्नानं किमस्ति ?

प्र.५ अलीकाभिमान उन्मादश्च केन भवति ?

## लघूत्तरात्मक-प्रश्नाः–

प्र. १ रागमलस्य अवलेपः बलवान् कथम् ?

प्र. २ अनर्थपरम्पराः काः ?

प्र. ३ गुरुवचनस्य प्रभावः अशिष्टस्य शिष्टस्य च कृते कीदृशः भवति ?

प्र. ४ गुरूपदेशः दोषजातं हृत्वा तं गुणरूपेण किमिव परिणमयति ?

प्र. ५ दुष्प्रकृतेः अन्वयः अविनयस्य च श्रुतं कीदृशं भवति ?

## निबन्धात्मक-प्रश्नाः–

प्र. १ 'भवादृशाः एव भवन्ति भाजनान्युपदेशानाम्' इति शुकनासः कथमब्रवीत् ?

प्र. २ गुरूपदेशस्य के के लाभाः ?

प्र. ३ राजप्रकृतेः वर्णनं कुरुत ।

प्र. ४ वर्तमानसमये अस्योपदेशस्य उपादेयतायाः समीक्षां कुरुत ।

## अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत –

(क) इन्द्रियहरिणहारिणी च सततदुरन्तेयम् **उपभोगमृगतृष्णिका**।

................................................................................................ ?

(ख) नाशयति च **दिङ्मोह** इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु।

................................................................................................ ?

(ग) कुसुमशरप्रहार जर्जरिते हि हृदि **जलमिव** गलत्युपदिष्टम्।

................................................................................................ ?

(घ) **असुवर्णविरचनम्** अग्राम्यं कर्णाभरणम्।

................................................................................................ ?

## व्याकरणात्मक-प्रश्नाः–

**१. अधो-लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः -**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | एव + अतिगहनम् | = | .......................... | .......................... |
| (ख) | खलु + अनर्थपरम्परा | = | .......................... | .......................... |
| (ग) | एक + एकम् | = | .......................... | .......................... |
| (घ) | गुरु + उपदेशः | = | .......................... | .......................... |
| (ङ) | दुष्प्रकृतेः +अन्वयः | = | .......................... | .......................... |

२. **अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विग्रहो विधेयः -**

| | सन्धिपदम् | | विच्छेदः | सन्धिनाम |
|---|---|---|---|---|
| (क) | स्फटिकमणाविव | = | .......................... | ............................ |
| (ख) | ज्योतिरालोकः | = | .......................... | ............................ |
| (ग) | नोद्वेगकरः | = | .......................... | ............................ |
| (घ) | गर्भेश्वरत्वम् | = | .......................... | ............................ |
| (ङ) | शृण्वन्तोऽपि | = | .......................... | ............................ |

३. **अधोलिखितानां पदानां नाम-निर्देशपूर्वक-समासो विधेयः -**

| | पदानि | | समासः | समासनाम |
|---|---|---|---|---|
| (क) | रागमलस्य अवलेपः | = | .......................... | ............................ |
| (ख) | यौवनस्य आरम्भे | = | .......................... | ............................ |
| (ग) | न आस्वादित | = | .......................... | ............................ |
| (घ) | राज्ञः प्रकृतिः | = | .......................... | ............................ |
| (ङ) | न आरोपितः | = | .......................... | ............................ |

४. **निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -**

| | समस्तपदम् | | विग्रहः | समासनाम |
|---|---|---|---|---|
| (क) | तिमिरान्धत्वम् | = | .......................... | ............................ |
| (ख) | अभव्यस्य | = | .......................... | ............................ |
| (ग) | राजलक्ष्मीः | = | .......................... | ............................ |
| (घ) | अनास्वादितविषयरसस्य | = | .......................... | ............................ |
| (ङ) | गुरूपदेशः | = | .......................... | ............................ |

५. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | बुद्धिः | .......................... | ...................... | ................... |
| (ख) | विषयेषु | .......................... | ...................... | ................... |
| (ग) | मनसि | .......................... | ...................... | ................... |
| (घ) | उपदेशस्य | .......................... | ...................... | ................... |
| (ङ) | वारिणा | .......................... | ...................... | ................... |
| (च) | उपदेष्टारः | .......................... | ...................... | ................... |

**६. निम्नलिखितानां तिङ्न्तपदानां धातुः-लकारः-पुरुषः-वचनञ्च पृथक् निर्दिश्यताम् -**

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | नाशयति | .................... | ................ | ................. | .................... |
| (ख) | भवन्ति | .................... | ................ | ................. | .................... |
| (ग) | हरति | .................... | ................ | ................. | .................... |
| (घ) | शृण्वन्ति | .................... | ................ | ................. | .................... |
| (ङ) | अनुगच्छन्ति | .................... | ................ | ................. | .................... |

**७. निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् -**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | विनीततरम् | ........................ | ....................... |
| (ख) | इच्छन् | ........................ | ....................... |
| (ग) | कर्तुम् | ........................ | ....................... |
| (घ) | अवलेपः | ........................ | ....................... |
| (ङ) | प्रहारः | ........................ | ....................... |

**८. अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत् -**

| | पदम् | | वाक्यम् |
|---|---|---|---|
| (क) | लक्ष्मीमदः | = | .......................................................................................... । |
| (ख) | यौवनारम्भे | = | .......................................................................................... । |
| (ग) | दहति | = | .......................................................................................... । |
| (घ) | अजलं स्नानम् | = | .......................................................................................... । |
| (ङ) | राजलक्ष्मीः | = | .......................................................................................... । |

**उत्तरमाला - वस्तुनिष्ठात्मक प्रश्नाः-**

१.(ख) २.(घ) ३.(ग) ४.(क)

❀ ❀ ❀

# तृतीयः पाठः

## मानवधर्मः

वेदार्थनिर्णये सहायकभूतेषु वेदाङ्गेषु कल्पसूत्राणाम् अतिमहनीयं स्थानं विद्यते। कल्पेषु चतुर्विधानां सूत्राणाम् अन्तर्भावो विद्यते। तानि सूत्राणि सन्ति – १. श्रौतसूत्राणि, २.गृह्यसूत्राणि ३. धर्मसूत्राणि ४. शुल्वसत्राणि। तेषु धर्मसूत्राणि एव धर्मशास्त्राणि, तान्येव च स्मृतिपदाख्यानि भवन्ति –

**''श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः''** ।

एतासु स्मृतिषु सामाजिक-विषयाणां, चतुर्णां पुरुषार्थानां, वर्णाश्रमधर्माणां, राजधर्माणाञ्च वर्णनं श्रुतिमनुसृत्य एव भवति। साम्प्रतम् उपलभ्यमानासु प्रायः पंचाशत-स्मृतिषु महर्षिमनुप्रणीतस्य मनुस्मृतेः स्थानमन्यतमम्।

द्वादशाध्यायात्मिकायामस्यां स्मृतौ धर्मस्वरूपं, वर्णाश्रमधर्माः, राजधर्माश्च विस्तरेण व्याख्याताः। मानवीय-जीवने कर्त्तव्याकर्त्तव्यविवेकप्रसङ्गे मनुस्मृतिः अद्यापि अस्माकं पन्थानं प्रशस्तीकरोति। भारतीय विधि-निर्माणे सामाजिक व्यवस्थायाञ्च मनुस्मृतेः विशिष्ट योगदानमस्ति। मनुस्मृतिः भारतीय संस्कृतौ मानवीयाचारस्य श्रेष्ठपरिचायिका अस्ति।

पाठोऽयं मनुस्मृतेः द्वितीय-तृतीय-चतुर्थ अध्यायाद् सङ्कलितः। अत्र वर्णितानाम् विविधविषयकानां पद्यानां सङ्कलनं विहितमस्ति। एषु पद्येषु मनुना आचारधर्मस्य, धर्मशास्त्रीय विविधविधानां व्यवस्थानां च विवेचनं कृतम्। ब्रह्मचारिणां विहिताविहित कर्मणाम्, इन्द्रियनिग्रहस्य, गृहस्थजीवने आचरणीय कर्त्तव्याकर्त्तव्यस्य च मार्मिकाः उपदेशाः वर्णिताः। विशेषरूपेण मातृ-पितृ-गुरुभक्तिः, अध्ययनशीलता, नारी-सम्मानः, संतोषप्रवृत्तिः सदृशाः श्लोकाः विद्यार्थिणां कृते परमोपयोगी भवितुं शक्यन्ते।

**श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः ।**
**इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ।।१ ।।**

**एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः ।**
**सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ।। २ ।।**

**इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।**
**संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ।। ३ ।।**

**इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।**
**संनियम्य तु तान्येव ततः सिद्धिं नियच्छति ।। ४ ।।**

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूयः एवाभिवर्धते ।। ५ ।।

वेदास्त्यागश्च यज्ञाश्च नियमांश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ।। ६ ।।

वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा ।
सर्वान् संसाधयेदर्थानक्षिण्वन् योगतस्तनुम् ।। ७ ।।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशोबलम् ।। ८ ।।

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ।
वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ।। ९ ।।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।१० ।।

विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ।।११ ।।

यथा खनन्खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ।।१२ ।।

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः।।१३।।

संतोषं परमास्थाय सुखार्थी संयतो भवेत् ।
संतोषमूलं हि सुखं दुःखमूलं विपर्ययः ।।१४ ।।

आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः ।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम् ।।१५ ।।

सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः ।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ।।१६ ।।

यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् ।
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत् यत्नेनः ।।१७ ।।

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ।।१८ ।।

❀ ❀ ❀

## अन्वय :–

१. हि मानव: श्रुति स्मृति उदितं धर्मम् अनुतिष्ठन् इह कीर्तिम् अवाप्नोति प्रेत्य च अनुत्तमं सुखम् (अवाप्नोति) ।

२. एक अक्षरं (ओ३म् इति) परं ब्रह्म कथ्यते। प्राणायामा: परं तप: कथ्यते। तु सावित्र्या: अपरं(किमपि) न अस्ति, सत्यं मौनात् विशिष्यते ।

३. अपहारिषु विषयेषु विचरताम् इन्द्रियाणां संयमे विद्वान् यत्नम् आतिष्ठेत्, यन्ता वाजिनां इव (यथा) ।

४. इन्द्रियाणां प्रसङ्गेन असंशयम् दोषम् ऋच्छति। तानि एव संनिम्य तु तत: सिद्धिं नियच्छति ।

५. कामानाम् उपभोगेन न जातु काम: शाम्यति, हविषा कृष्णवर्त्मा इव भूय: एव अभिवर्धते।

६. विप्रदुष्टभावस्य वेदा:, त्याग:, यज्ञा:, नियमा:, तपांसि च कर्हिचित् सिद्धिं न गच्छन्ति।

७. इन्द्रियग्रामं वशे कृत्वा मन: च तथा संयम्य, योगत: तनुम् अक्षिण्वन् सर्वान् अर्थान् संसाधयेत्।

८. नित्यम् अभिवादनशीलस्य, वृद्धोपसेविन:, तस्य आयु: विद्या यश: बलं चत्वारि वर्द्धन्ते।

९. भूतानाम् अनुशासनम् अहिंसया एव कार्यं श्रेय:। धर्मम् इच्छता मधुरा श्लक्ष्णा च वाक् एव प्रयोज्या।

१० यत्र तु नार्य: पूज्यन्ते तत्र देवता: रमन्ते। यत्र एता: तु न पूज्यन्ते तत्र सर्वा: क्रिया: अफला: (भवन्ति)।

११. विषात् अपि अमृतं ग्राह्यं, बालात् अपि सुभाषितम् (ग्राह्यं), अमित्रात् अपि सद्वृत्तम् (ग्राह्यं) अमेध्यात् अपि काञ्चनम् ।

१२. यथा नर: खनित्रेण खनन् वारि अधिगच्छति, शुश्रूषु: तथा गुरुगतां विद्याम् अधिगच्छति।

१३. इह धर्मार्थौ श्रेय: उच्यते, कामार्थौ (श्रेय: उच्यते) धर्म एव (श्रेय:), अर्थ एव (श्रेय:) ह वा। स्थिति तु त्रिवर्ग (एव) श्रेय: इति।

१४. संयत: संतोषं परम् आस्थाय सुखार्थी भवेत्। हि संतोषमूलं सुखं विपर्यय: दु:खमूलम्।

१५. हि प्रजा: आचारात् ईप्सिता: आयु लभते। आचारात् अक्षय्य धनम् लभते। आचार: अलक्षणं हन्ति।

१६. नर: य: सदाचारवान्, श्रद्दधान: अनसूय: च (स:) सर्वलक्षणहीन: अपि शतं वर्षाणि जीवति।

१७. यत् यत् परवशं कर्म तत् तत् यत्नेन वर्जयेत्। तु यत् यत् आत्मवशं (कर्म) स्यात् तत् तत् यत्नत: सेवेत्।

१८. परवशं सर्वं (कर्म) दु:खं , सर्वम् आत्मवशं (कर्म) सुखम्। एतत् सुखदु:खयो: लक्षणं समासेन विद्यात् ।

## शब्दार्था: टिप्पण्यश्च

| | | |
|---|---|---|
| **श्रुतिस्मृत्युदितं** | = | श्रुति स्मृति उदितं, (वेदग्रन्थेषु धर्मशास्त्रेषु च वर्णितम्) |
| **चानुत्तमम्** | = | च अनुत्तमम् (सर्वोत्कृष्ट इति अर्थ:) |
| **प्रेत्य** | = | परलोकस्य स्थिति (इस संसार से विदा होकर मरने के पश्चात् आत्मा की अवस्था), प्र + इ+ल्यप् = प्रेत्य। |

| | | |
|---|---|---|
| **एकाक्षरम्** | = | ओ३म् इति ओंकार, प्रणवाक्षर, एक + अक्षरम् (दीर्घ सन्धि)। |
| **प्राणायामाः** | = | श्वास–प्रश्वासस्य स्थितिः, पुरक–कुम्भक–रेचक इति त्रिविध प्राणायामाः। |
| **विषयेष्वपहारिषु** | = | अपहारिषु विषयेषु, अपहरण किये जा रहे विषयों में। |
| **यन्तेव वाजिनाम्** | = | अश्वानां नियन्त्रणे सारथिवत् (रथ के घोड़ों को जिस प्रकार सारथि नियन्त्रित करता है), यन्ता + इव (गुण सन्धि) |
| **प्रसङ्गेन** | = | इन्द्रियविषयसम्पर्केन (इन्द्रियों का विषयों से सम्पर्क हो जाने से) |
| **संनियम्य** | = | नियन्त्रणं कृत्वा (संयम पूर्वक), सम् + नि + यम् + ल्यप्। |
| **जातु** | = | संभवतः, कदाचित् (कभी), जन् + क्तुन्। |
| **हविषा** | = | आहुति द्वारा, (हवनीय द्रव्यप्रदत्त आहुति से) तृतीया, एकवचन। |
| **कृष्णवर्त्मेव** | = | अग्निः इव, कृष्णवर्त्मा + इव (गुण सन्धि) |
| **विप्रदुष्टभावस्य** | = | दूषितः, विकृत्, भ्रष्टः(मलिन भाव रखने वाले के), षष्ठी एकवचन। |
| **संसाधयेदर्थानक्षिण्वन्** | = | संसाधयेत् अर्थान् अक्षिण्वन्, (शरीर को) क्षीण होने से बचाते हुए अर्थों (कामनाओं) को साधना चाहिये)। |
| **योगतस्तनुम्** | = | योगतः शरीरम्, योग +तसिल् = योगतः, योगतः + तनुम् (विसर्ग सन्धि) |
| **अहिंसयैव** | = | अहिंसया एव (अहिंसा से ही), अहिंसया + एव (वृद्धि सन्धि)। |
| **भूतानाम्** | = | प्राणिनाम् (जीवित प्राणियों का), षष्ठी विभक्ति, बहुवचन। |
| **श्लक्ष्णा** | = | सौम्येन, निश्छलेन (ईमानदारी से), श्लक्ष्ण, तृतीया एकवचन। |
| **तत्राफलाः** | = | यत्र नारी अपमानः तत्र सर्वाः क्रियाः अफलाः इत्यर्थः, तत्र + अफलाः (दीर्घ)। |
| **विषादप्यमृतं** | = | विषाद् अपि अमृतं ग्राह्यम् इत्यर्थः (विष में भी अमृत ढूँढना चाहिये) |
| **सुभाषितम्** | = | शोभनं भाषितम् (सुन्दर अथवा उत्कृष्ट वचन), सु + भाष् + क्त। |
| **अमेध्यादपि** | = | अपवित्रादपि (मलिन या मलयुक्त से भी), अमेध्यात् +अपि (जश्त्व) |
| **वार्यधिगच्छति** | = | जलं प्राप्नोति, वारि + अधिगच्छति (यण सन्धि)। |
| **शुश्रूषुः** | = | श्रवण किंवा सेवा इच्छुकः (आज्ञाकारी छात्र), श्रु + सन्(द्वित्वादि)+ उ। |

| | | |
|---|---|---|
| **धर्मार्थावुच्यते** | = | धर्म-अर्थौ उच्यते। धर्म + अर्थ + उच्यते (दीर्घ, अयादि सन्धि)। |
| **श्रेयस्त्रिवर्ग** | = | धर्म-अर्थ-काम इति त्रिवर्गः श्रेयस्करः, श्रेयः + त्रिवर्गः (सत्व सन्धि) |
| **विपर्ययः** | = | वैपरित्य, उल्लंघनः वा (दुर्भाग्य), वि + परि + अस् + क्त । |
| **सदाचारवान्नरः** | = | सदाचारी मनुष्यः, सदाचारवान् + नरः । |
| **श्रद्धानोऽनसूयश्च** | = | श्रद्धावान् ईर्ष्यारहितः च। न असूयः (नञ् तत्पुरुष) |
| **यद्यत्परवशम्** | = | यत् यत् परकीयाधीन, नास्ति स्वाधीनम् (जो कार्य पराधीन हैं)। |
| **समासेन** | = | संक्षिप्तेन। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

**प्र. १.** प्राणायामाः कतिविधः भवन्ति ?

(क) द्विविधः (ख) चतुर्विधः

(ग) त्रिविधः (घ) पञ्चविधः ( )

**प्र. २.** 'श्रुतिस्मृति' रूपेण के ग्रन्थाः परिगण्यते ?

(क) वेदशास्त्र-धर्मशास्त्र (ख) अर्थशास्त्र-कामशास्त्र

(ग) इतिहास-पुराण (घ) वेदांग-उपनिषद् ( )

**प्र. ३.** इन्द्रियाणां संख्या वर्तन्ते ?

(क) पञ्च (ख) षट्

(ग) दश (घ) एकादश ( )

**प्र. ४.** 'श्रेयस्त्रिवर्गः' अस्मिन् पदे त्रिवर्गस्य किमर्थम् ?

(क) धर्मः (ख) अर्थः

(ग) कामः (घ) एते सर्वे ( )

**प्र. ५. रिक्तस्थानपूर्तिः क्रियताम्–**

(क) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र ........................... ।

(ख) .......................... परमास्थाय सुखार्थीः संयतो भवेत्।

(ग) श्रद्धधानोऽनसूयश्च ............................. वर्षाणि जीवति।

(घ) इह कीर्तिमवाप्नोति प्रेत्य ................................. सुखम्।

**प्र. ६. अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत–**

(क) सत्यं मौनात् विशिष्यते ।

........................................................................................... ?

(ख) कामानाम् उपभोगेन कामः न शाम्यति ।

........................................................................................... ?

(ग) आचारः अलक्षणं हन्ति ।

........................................................................................... ?

(घ) ईप्सिताः प्रजाः आचारात् लभते ।

........................................................................................... ?

## अतिलघूत्तरात्मक-प्रश्नाः–

प्र.१. परं तपः किमस्ति?

प्र.२. अक्षय्यं धनं कस्मात् लभते?

प्र.३. गुरुगतां विद्यां कः अधिगच्छति?

प्र.४. शतं वर्षाणि कः जीवति?

प्र.५. अमित्रादपि किं ग्राह्यम् ?

## लघूत्तरात्मक-प्रश्नाः –

प्र.१. श्रुतिस्मृतिग्रन्थान् अनुसृत्य किम् अवाप्नोति?

प्र.२. इन्द्रियाणां संयमे विद्वान् यत्नं कथम् आचरेत्?

प्र.३. सुखदु:खयोः मूलं किम्?

प्र.४. आचारात् किं-किं लभन्ते?

प्र.५. सुखदु:खयोः लक्षणं किम्?

## निबन्धात्मक-प्रश्नाः –

प्र. १. इन्द्रियसंयमस्य महत्त्वं प्रतिपादयत ?

प्र. २. 'सन्तोषमूलं हि सुख' किमर्थम् उच्यते ?

प्र. ३. पाठस्य द्वादश-सप्तदशयोः श्लोकयोः सप्रसङ्ग व्याख्या विधेया ।

## व्याकरणात्मक-प्रश्नाः –

**१. अधो-लिखितेषु पदेषु नामोल्लेखपूरस्सरसन्धिः कार्यः -**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | वृद्ध + उपसेविनः | = | | |
| (ख) | कृष्णवर्त्मा + इव | = | | |
| (ग) | आचारात् + लभते | = | | |
| (घ) | नार्यः + तु | = | | |
| (ङ) | अमित्रात् + अपि | = | | |

**२. अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विग्रहो विधेयः -**

| | सन्धिपदम् | विच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | चानुत्तमम् | | |
| (ख) | तान्येव | | |
| (ग) | यत्रैतास्तु | | |
| (घ) | बालादपि | | |
| (ङ) | वार्यधिगच्छति | | |

**३. अधोलिखितानां पदानां नाम-निर्देशपूर्वक-समासो विधेयः -**

| | पदानि | समासः | समासनाम |
|---|---|---|---|
| (क) | न संशयम् | | |
| (ख) | दुःखस्य मूलम् | | |
| (ग) | धर्मश्च अर्थश्च | | |
| (घ) | सर्वेभ्यः लक्षणेभ्यः हीनः | | |
| (ङ) | कामश्च अर्थश्च | | |

४. **निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -**

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | सुखार्थी | | |
| (ख) | अक्षिण्वन् | | |
| (ग) | सदाचारः | | |
| (घ) | अनसूयः | | |
| (ङ) | अलक्षणम् | | |

५. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | विषयेषु | | | |
| (ख) | तपांसि | | | |
| (ग) | नरः | | | |
| (घ) | सर्वान् | | | |
| (ङ) | समासेन | | | |

६. **निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनं च पृथक् निर्दिश्यताम् -**

| | तिङ्न्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | आतिष्ठेत् | | | | |
| (ख) | ऋच्छति | | | | |
| (ग) | वर्द्धन्ते | | | | |
| (घ) | अधिगच्छति | | | | |
| (ङ) | हन्ति | | | | |

७. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् -**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | संयम्य | | |
| (ख) | कार्यम् | | |

(ग) कृत्वा

(घ) सुभाषितम्

(ङ) ग्राह्यम्

**८. अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत –**

| पदम् | वाक्यम् |
|---|---|
| (क) आचारः | ........................................................................................ । |
| (ख) संतोष | ........................................................................................ । |
| (ग) अहिंसा | ........................................................................................ । |
| (घ) आत्मवश | ........................................................................................ । |
| (ङ) मधुरा | ........................................................................................ । |

## उत्तरमाला

वस्तुनिष्ठात्मक-प्रश्नाः १. (ग) २.(क) ३. (घ) ४. (घ)

❀ ❀ ❀

# चतुर्थः पाठः

# गीतामृतम्

श्रीमद्भगवद्गीता महर्षि वेदव्यासविरचितस्य सांस्कृतिकविश्वकोष नाम्ना प्रसिद्धस्य महाभारतस्य अंशभूतास्ति। गीता स्वतन्त्रग्रन्थतयापि संस्कृतसाहित्यस्य सर्वोच्चं गौरवभूतं ग्रन्थरत्नरूपेण जनैः समाद्रियते। भगवद्गीता श्रुतीनां, उपनिषदां, दर्शनानाम् च सारतत्त्वं प्रस्तौति। उपनिषत्सु दार्शनिकविचाराणां सिद्धान्तानां वा काठिन्यमस्ति, परन्तु गीतायां मनोज्ञया पद्धत्या तेषां संक्षेपतः भावप्रकाशनमतीव हृद्यं प्रतीयते। यथोक्तम् –

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ।।**

यदि केवलं सप्तशती गीतेका एव अधीयते, विविच्यते, चिन्त्यते, लौकिकजीवने व्यवह्रियते च तर्हि मानवजीवनं सर्वथा सुख–शान्ति–समन्वितं समुन्नतं च भविष्यति। समालोचनेन एतत् सिध्यति यद् गीता मानवजीवने कर्मोपदेशं प्रसारयति, लोकहितं सम्पादयति, लोकजीवने च निःश्रेयसे कल्पते। इदमेव वैशिष्ट्यमालक्ष्य श्लोकमिदं केनापि साधूच्यते –

**गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृताः ।।**

श्रीमद्भगवद्गीता महाभारतस्य भीष्मपर्वणि विद्यते। कुरुक्षेत्रस्य युद्धभूमौ विषादग्रस्त अर्जुनाय निष्कामकर्मणः शिक्षां प्रयच्छता भगवता श्रीकृष्णेन अत्र ज्ञान–भक्ति–कर्मणां समन्वयः प्रस्तुतः। पाठेऽस्मिन् गीतायाः द्वितीयोऽध्यायतः द्वादशाध्याय पर्यन्तं कर्मयोग–आत्मसंयमयोग–भक्तियोगस्य च महत्त्वपूर्णाः श्लोकाः विहिताः। अनासक्त भावेनैव कार्यकरणं गीतायाः परमोपदेशः। ज्ञानविज्ञानसमन्वयः, निष्कामकर्मदीक्षा, अनासक्तभावेन क्रियमाणकर्मणो बन्धनमुक्तित्वं, कर्त्तव्यपालनेन श्रेयः सम्पादनत्वञ्च सर्वमपि प्रतिपादनमतीव सारल्येन वर्णितमस्ति।

## ( कर्मयोगः )

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।**
**सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ।।१।।**

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।**
**शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।२ ।।**

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ।।३ ।।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।४ ।।



## ( आत्मसंयम योगः )

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।।५ ।।

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ।।६ ।।

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।।७ ।।

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ।।८ ।।

## ( भक्तियोग: )

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धय: ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रता: ।।९ ।।

अद्वेष्टा सर्वभूतानां मैत्र: करुण एव च ।
निर्ममो निरहङ्कार: समदु:खसुख: क्षमी ।।१० ।।

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च य: ।
हर्षामर्षभयोद्वेगैर्मुक्तो य: स च मे प्रिय: ।।११ ।।

यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ।
शुभाशुभपरित्यागी भक्तिमान्य: स मे प्रिय: ।।१२ ।।

❀ ❀ ❀

## अन्वय: –

१. धनञ्जय ! सङ्गं त्यक्त्वा, योगस्थ: ( भूत्वा ), सिद्ध्यसिद्ध्यो: समो भूत्वा कर्माणि कुरु। ( यतो हि ) समत्वं ( एव ) योग उच्यते ।

२. त्वं नियतं कर्म कुरु । हि अकर्मण: कर्म ज्याय: । अकर्मण: च ते शरीर यात्रा अपि न प्रसिद्धयेत्।

३. हि जनकादय: कर्मणा एव संसिद्धिम् आस्थिता । लोकसंग्रहम् एव अपि सम्पश्यन् ( कर्म ) कर्तुम् अर्हसि ।

४. यद् यद् श्रेष्ठ: आचरति तत् तत् एवेतर: जन: ( आचरति ) । स: यत् प्रमाणं कुरुते लोक: तत् अनुवर्तते।

५. आत्मना आत्मानम् उद्धरेत्, आत्मानम् न अवसादयेत्। हि आत्मा एव आत्मन: बन्धु:, आत्मा एव आत्मन: रिपु: ।

६. युक्त आहारविहारस्य, कर्मसु युक्तचेष्टस्य, सर्वकामेभ्य: नि:स्पृह:, तदा युक्त: इति उच्यते।

७. य: मां सर्वत्र पश्यति, सर्वं च मयि पश्यति, तस्य अहं न प्रणश्यामि स च मे न प्रणश्यति ।

८. असंयत आत्मना योग: दुष्प्राप ( भवति ) । तु वश्य आत्मना यतता उपायत: अवाप्तुं शक्य: इति मे मति:।

९. सर्वत्र समबुद्धय: इन्द्रियग्रामं सन्नियम्य, सर्वभूतहिते रता:– ते माम् एव प्राप्नुवन्ति ।

१०. सर्वभूतानाम् एव अद्वेष्टा मैत्र: करुण निर्ममो निरहंकार: समदु:खसुख: क्षमी च । ( ....स मे प्रिय: )

११. यस्मात् लोक: न द्विजते, य: लोकात् न द्विजते च, य: हर्षम् अमर्ष भय उद्वेगै: मुक्त: स च मे प्रिय:।

१२. य: न हृष्यति न द्वेष्टि न शोचति न कांक्षति, य: शुभाशुभपरित्यागी, य: भक्तिमान् स मे प्रिय:।

## शब्दार्थाः टिप्पणयश्च

| | | |
|---|---|---|
| **योगस्थः** | = | योगे स्थित्वा (योग में स्थित होकर)। |
| **धनञ्जय** | = | धनं/धनानि जयति इति धनञ्जय (अर्जुन) |
| **ज्यायो** | = | श्रेष्ठतरः। |
| **ह्यकर्मणः** | = | हि + अकर्मणः (यण् सन्धि), कर्म अकृत्वा (क्योंकि कर्म न करके)। |
| **कर्मणैव** | = | कर्मणा एव (कर्म से ही), वृद्धि सन्धि। |
| **संसिद्धिमास्थिता** | = | सिद्धिं प्राप्ताः इत्यर्थः, सिध् + क्तिन् (द्वितीया एकवचन), आङ् + स्था + क्त, प्रथमपुरुषः, बहुवचनम् (सफलता को प्राप्त हुए थे) |
| **लोकसंग्रहम्** | = | लोककल्याण, लोकस्य संग्रहम् (षष्ठी तत्पुरुष)। |
| **यद्यदाचरति** | = | यत् यत् आचरति (व्यवहरति इति), यत् + यत् + आचरति (जश्त्व)। |
| **देवेतरो** | = | मनुष्यवर्गः, देव + इतरः (गुण सन्धि)। |
| **उद्धरेत्** | = | त्रायेत, रक्षेत् इत्यर्थः, उत् + हृ + विधिलिंग, प्रथमपुरुष, एकवचन। |
| **आत्मनात्मानं** | = | आत्मना आत्मानं (स्वयं से स्वयं को), दीर्घ सन्धि। |
| **रिपुरात्मनः** | = | स्वस्य शत्रुः (स्वयं का शत्रु), रिपुः + आत्मनः (रुत्व सन्धि)। |
| **युक्ताहारविहारस्य** | = | युक्त आहार विहारस्य (आहारे विहारे च युक्तस्य, योगिनः)। |
| **निःस्पृहः** | = | स्पृहा रहितः (कामना रहित), अव्ययीभाव समास। |
| **असंयतात्मना** | = | असंयत आत्मना (आत्मा से असंयमित रहने वाला)। |
| **दुष्प्राप** | = | अप्राप्य, दुष्प्राप्य, दुस् + प्राप = दुष्प्राप (ष्टुत्व सन्धि)। |
| **अवाप्तुमुपायतः** | = | उपायतः प्राप्तुं, अव् + आप् + तुमुन् = अवाप्तुम् (यत्नपूर्वक संयमित उपाय से योग को प्राप्त किया जा सकता है)। |
| **इन्द्रियग्रामं** | = | इन्द्रियसमूह (५ ज्ञानेन्द्रिय + ५ कर्मेन्द्रिय + मन = ११ इन्द्रिय)। |
| **अद्वेष्टा** | = | द्वेष रहितः, घृणा रहितः, अ + द्विष् + तृच् = अद्वेष्टा। |
| **निर्ममो** | = | ममता रहितः (अहङ्कारशून्य)। |
| **क्षमी** | = | क्षमावान्, क्षमाशीलः (क्षमा करने में समर्थ)। |
| **यस्मान्नोद्विजते** | = | यस्मात् न उद्विजते (जिससे संसार उद्वेग को प्राप्त नहीं होता)। |
| **हृष्यति** | = | हर्षति (प्रसन्न होता है), हृष् धातु, लट्, प्रथमपुरुष, एकवचन। |
| **द्वेष्टि** | = | घृणा करोति (द्वेष करता है), द्विष्, लट्, प्रथमपुरुष, एकवचन। |
| **भक्तिमान्** | = | ईश्वरभक्तः, भक्ति + मतुप् = भक्तिमान्। |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

प्र. १. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति ?

(क) भीष्म पर्वणि

(ख) वन पर्वणि

(ग) सभा पर्वणि

(घ) विराट् पर्वणि ( )

प्र. २. 'धनञ्जयः' कस्य अपरं नाम ?

(क) युधिष्ठिरस्य

(ख) भीमस्य

(ग) सहदेवस्य

(घ) अर्जुनस्य ( )

प्र. ३. योगस्य लक्षणं वर्तते ।

(क) रतिः

(ख) समत्वम्

(ग) वितृष्णा

(घ) आसक्तिः ( )

प्र. ४. 'स च मे प्रियः' वाक्येऽस्मिन् 'मे' कस्यकृते प्रयुक्तः ?

(क) अर्जुनस्य

(ख) भीष्मस्य

(ग) श्रीकृष्णस्य

(घ) वेदव्यासस्य ( )

**प्र. ५. रिक्तस्थानपूर्तिः क्रियताम् –**

(क) योगस्थः कुरु कर्माणि ............... ................ धनञ्जय ।

(ख) सः यत्प्रमाणं कुरुते ..................... तदनुवर्तते ।

(ग) उद्धरेत् ....................... ..................... न .......................... अवसादयेत् ।

(घ) शुभाशुभपरित्यागी भक्तिमान्यः स मे ..................... ।

## अतिलघूत्तरात्मक-प्रश्नाः–

प्र.१. अकर्मणः कः ज्यायः ?

प्र.२. आत्मनः बन्धुः कः ?

प्र.३. योगः कस्य कृते दुष्प्राप भवति ?

प्र.४. जनकादयः केन सिद्धिमास्थिताः ?

प्र.५. 'शुभाशुभपरित्यागी' इति कस्य लक्षणम् ?

## लघूत्तरात्मक-प्रश्नाः–

प्र.१. कस्मात् शरीरयात्रा न प्रसिद्धयेत् ?

प्र.२. आत्मनः रिपुः आत्मा कथम् ?

प्र.३. युक्तस्य का परिभाषा ?

प्र.४. भगवन्तं (श्रीकृष्णम्) के प्राप्नुवन्ति ?

प्र.५. श्रीकृष्णस्य कृते के प्रियः सन्ति ?

## अधोलिखितवाक्येषु रेखाङ्कितान् पदान् आश्रित्य प्रश्ननिर्माणं कुरुत –

(क) लोकसंग्रहम् एवापि सम्पश्यन् (कर्म) कर्तुमर्हसि ।

.. .. .. ........................................................................................... ?

(ख) स यत्प्रमाणं कुरुते लोकः तदनुवर्तते ।

.................................................................................................... ?

(ग) न आत्मानम् अवसादयेत् ।

.................................................................................................... ?

(घ) ते प्राप्नुवन्ति माम् एव सर्वभूतहिते रताः ।

.................................................................................................... ?

## निबन्धात्मक-प्रश्नाः–

प्र.१. कर्मयोगस्य महत्त्वं प्रतिपादयत ?

प्र.२. पञ्चम श्लोकस्य व्याख्या विधेया ।

प्र.३. भक्तियोगस्य लक्षणानि प्रतिपादयत ।

## व्याकरणात्मक-प्रश्नाः –

१. **अधो-लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः –**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | शरीरयात्रा + अपि | = | .............................. | ........................... |
| (ख) | कर्मणा + एव | = | .............................. | ........................... |
| (ग) | रिपुः + आत्मनः | = | .............................. | ........................... |
| (घ) | हि + आत्मनो | = | .............................. | ........................... |
| (ङ) | सिद्धि + असिद्धयोः | = | .............................. | ........................... |

२. **अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विच्छेदो विधेयः –**

| | सन्धिपदम् | विच्छेदः | सन्धिनाम |
|---|---|---|---|
| (क) | लोकस्तदनुवर्तते | .............................. | ........................... |
| (ख) | बन्धुरात्मैव | .............................. | ........................... |
| (ग) | इत्युच्यते | .............................. | ........................... |
| (घ) | हर्षामर्ष | .............................. | ........................... |
| (ङ) | आत्मैव | .............................. | ........................... |

३. **अधोलिखितानां पदानां नाम-निर्देशपूर्वक-समासो विधेयः –**

| | पदानि | समासः | समासनाम |
|---|---|---|---|
| (क) | धनं जयति यः सः | .............................. | ........................... |
| (ख) | सिद्धि असिद्धयोः च | .............................. | ........................... |
| (ग) | सर्वेभ्यः कामेभ्यः | .............................. | ........................... |
| (घ) | न संयत | .............................. | ........................... |
| (ङ) | आत्मा वशे यस्य सः | .............................. | ........................... |

४. **निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः –**

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | युक्ताहारविहारस्य | ........................................................ | ........................... |

| | | | |
|---|---|---|---|
| (ख) | शरीरयात्रा | ................................................ | .......................... |
| (ग) | निस्पृहः | ................................................ | .......................... |
| (घ) | अद्वेष्टा | ................................................ | .......................... |
| (ङ) | समदुःखसुखः | ................................................ | .......................... |

५. **अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | आत्मनः | ........................... | ......................... | .......................... |
| (ख) | युक्तचेष्टस्य | ........................... | ......................... | .......................... |
| (ग) | सर्वभूतानाम् | ........................... | ......................... | .......................... |
| (घ) | माम् | ........................... | ......................... | .......................... |
| (ङ) | आत्मानम् | ........................... | ......................... | .......................... |

६. **निम्नलिखितानां तिङ्तपदानां धातुः-लकारः-पुरुषः-वचनञ्च पृथक् निर्दिश्यताम् -**

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | अर्हसि | .................. | .................. | .................. | ...................... |
| (ख) | कुरुते | .................. | .................. | .................. | ...................... |
| (ग) | उद्धरेत् | .................. | .................. | .................. | ...................... |
| (घ) | पश्यन्ति | .................. | .................. | .................. | ...................... |
| (ङ) | प्राप्नुवन्ति | .................. | .................. | .................. | ...................... |

७. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक् लिख्यताम् -**

| | पदम् | प्रकृतिः | + | प्रत्ययः |
|---|---|---|---|---|
| (क) | त्यक्त्वा | | | |
| (ख) | युक्तः | | | |
| (ग) | अवाप्तुम् | | | |
| (घ) | योगः | | | |
| (ङ) | कर्तुम् | | | |

८. **अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत-**

| | पदम् | वाक्यम् |
|---|---|---|
| (क) | आत्मा | ........................................................................................ । |
| (ख) | भक्तिमान् | ........................................................................................ । |
| (ग) | कर्माणि | ........................................................................................ । |
| (घ) | अद्वेष्टा | ........................................................................................ । |
| (ङ) | प्रियः | ........................................................................................ । |

## उत्तरमाला

१. वस्तुनिष्ठात्मक-प्रश्नाः (क) २. (घ) ३. (ख) ४. (ग)

❀ ❀ ❀

# पञ्चमः पाठः
# मेघदूतपीयूषम्

संस्कृतसाहित्ये महाकविः कालिदासः अप्रतिमकवि रूपेण आद्रियते। कवेरस्य स्थितिः काल खीस्तपूर्वप्रथमशताब्दौ स्वीक्रियते। कवेरस्य जन्मस्थान-वंश-जीवनविषये विद्वांसः विवदमानाः अपि, जनश्रुतिभिः, अनुमानैः, तस्य रचनासाक्ष्यैश्च स्वीकुर्वन्ति यत् कवेरस्य जन्मः ब्राह्मणवंशेऽभवत्, उज्जयिनी तस्य वासभूमिरासीत्। महाकविरयम् भारतीयसंस्कृति- साहित्य-जीवनदर्शनानाञ्च प्रतिनिधिकविरुपेण राजते। तस्य काव्ये काव्योचितभावगाम्भीर्य-प्रेमाभिव्यक्ति-प्रकृतिचित्रणं- शास्त्रोचितभव्यतौदार्यम् रसछन्दालङ्कारादीनिकाव्यकलानिकषानिप्रतिमानानि च अतिशयेन फलितानि। तस्यप्रेमनिष्यन्दिनीभिः सूक्तिभिः मानवजीवनस्य कृते दुर्लभतमः सन्देश प्रकाश्यते।

मेघदूतपीयूषम् महाकविकालिदासरचितस्य-'मेघदूत' इति नामधेयस्य गीतिकाव्यस्य सूक्तियुक्तानां प्रतिनिधिपद्यानां संकलनमस्ति। कवेः रागात्मिका वृत्तिरेव गीतिकाव्यस्य जननी भवति। लोकराग-प्रेमामृतसाधना-प्रकृतिपूजन-संस्कृतिसौन्दर्यचेतना-मानवमनोविज्ञान-कविकल्पनाविलासादिभिर्गुणैः 'मेघदूत' गीतिकाव्यानां चूड़ामणिरिव राजते।

कृतिरियं 'पूर्वमेघः', 'उत्तरमेघश्च' इति द्वयोः विभागयोः विभक्ता। पूर्वमेघस्य कथायां कोऽपि प्रिया वियोगी यक्षः कर्त्तव्यपालनप्रमादात् स्वस्वामिना कुबेरेण वर्षभोग्येण स्वदेशनिर्वासनरूपेण शापेन शप्तः भूत्वा रामगिरिपर्वते निवसति। आषाढ़स्य प्रथमदिवसे सजलमेघं दृष्ट्वा सद्य परिणीतां स्वप्राणप्रियां स्मृत्वा स्मृत्वा स यक्षः भावपयोधौ निमग्नः भूत्वा पुरोदृश्यमानं मेघं मित्र भावेन विरहव्यथितां प्रियासकाशं सन्देशाहरणाय याचते। सा विरहिणी हिमालय स्थितायां अलकापुर्यां निवसति। यक्षः मेघभागेस्थितानां नगरसरित्वनगिरिगह्वराणां सौन्दर्यसंवेदनाप्रतिपादनप्रसङ्गैः सहृदयानां चेतांसि आहरति। उत्तरमेघे प्रणयसाधना साधकः सः यक्षः प्रियायाः विरहदशां वर्णयित्वा मेघं प्रियाकृते अस्मै सन्देशाय निवेदयति यत्- हे कल्याणि त्वं धैर्यं धारय, यतो हि जीवने सुखदुःखादयः रथचक्रेव परिवर्तनशीलाः भवन्ति न तु स्थायिनः। मेघोऽपि तं सर्वं श्रुत्वा अलकां प्रति गतवान् यक्षिण्यै च सन्देशं श्रावितवान्। कुबेरश्च एतद् वृतान्तं ज्ञात्वा करुणाद्रचेतः सन् शापावसानं कृत्वा तयोः मेलनं चकार।

सम्पूर्णं मेघदूतम्, 'मन्दाक्रान्ता' छन्देन छन्दोबद्धः, विप्रलम्भशृङ्गारस्य उत्कृष्टोदाहरणं च विद्यते।

१. कश्चित् कान्ताविरहगुरुणास्वाधिकारात् प्रमत्तः,
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः
यक्षश्चक्रेजनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।पूर्वमेघः, १ ।।

२. धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्वपटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ताः हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।।पूर्वमेघः, ५ ।।

३. जातं वंशे भुवनविदिते पुष्करावर्तकानाम्
जानामि त्वां प्रकृति-पुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।पूर्वमेघः, ६ ।।



४. तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहितगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यः पाति प्रणयिहृदयं विप्रयोगे रुणद्धि।।पूर्वमेघः, ९ ।।

५. त्वामासारप्रशमितवनोपप्लवंसाधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतंसानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय,
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।।पूर्वमेघः, १७ ।।

६. तां कस्याञ्चिद् भवनवलभौसुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्र।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः।।पूर्वमेघः, ४१ ।।

७. तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा,
बाधेतोल्काक्षपितचमरीवालभारो दवाग्निः।
अर्हस्येनं शमयितुमलं वारिधारासहस्त्रै-
रापन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम्।।पूर्वमेघः, ५७।।

८. एभिः साधोहृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायंभवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्।।उत्तरमेघः, २० ।।

९. सा संन्यस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेनगात्रम्।
त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यं,
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा।।उत्तरमेघः, ३३ ।।

१०. इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव।
श्रोष्यत्यस्मात् परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः सङ्गमात् किंचिदूनः।।उत्तरमेघः, ४० ।।

११. नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे,
तत्कल्याणि! त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तंसुखमुपनतं दुःखमेकान्ततो वा,
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।।उत्तरमेघः, ४९ ।।

१२. कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव।।उत्तरमेघः, ५४ ।।

## अन्वयः–

१. स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तङ्गमितमहिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धछायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

२. धूमज्योतिःसलिलमरुतां सन्निपातः मेघः क्व? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व? इति औत्सुक्यात् अपिरगणयन् गुह्यकः तं ययाचे, हि कामार्ता चेतनाऽचेतनेषु प्रकृतिकृपणाः (भवन्ति)।

३. (हे मेघ) त्वां भुवनविदिते पुष्करावर्तकानां वंशे जातं मघोनः कामरूपं प्रकृतिपुरुषम् (अहम्) जानामि। तेन विधिवशात् दूरबन्धुः अहम् त्वयि अर्थित्वं गतः। अधिगुणे मोघा (अपि) याच्ञा वरम् (किन्तु) अधमे लब्धकामा (अपि) न वरम्।

४. (हे मेघ) दिवसगणनातत्पराम् (अत एव) अव्यापन्नां ताम् एकपत्नीं भ्रातृजायां च अवहितगतिः (त्वं) अवश्यं दृक्ष्यसि। हि आशाबन्धः अङ्गनानांकुसुम सदृशं (अतएव) विप्रयोगे सद्यःपाति प्रणयि हृदयं प्रायशः रुणद्धि।

५. आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवम् अध्वश्रमपरिगतं त्वां साधुमूर्ध्ना वक्ष्यति। क्षुद्रोऽपि संश्रयाय मित्रेप्राप्ते प्रथमसुकृतापेक्षया विमुखो न भवति, यः तथा उच्चैः (सः) किं पुनः।

६. चिरविलसनात् खिन्नविद्युतकलत्रः भवान् सुप्तपारावतायां कस्याञ्चिद् भवनवलभौ तां रात्रिं नीत्वा सूर्ये दृष्टे पुनः अपि अध्वशेषं वाहयेत्। सुहृदाम् अभ्युपेतार्थकृत्याः न मन्दायन्ते खलु।।

७. वायौ सरति सरलस्कन्धसंघट्टजन्मा उल्काक्षपितचमरीबालभारः दावाग्निः तं बाधेत् चेत् एनं वारिधारासहस्रैः अलं शमयितुम् अर्हसि। हि उत्तमानां सम्पदः आपन्नार्ति प्रशमनफलाः (भवन्ति)

८. हृदयनिहितैः एभिः लक्षणै च द्वारोपान्ते लिखित वपुसौ शङ्खपद्मौ दृष्ट्वा नूनम् अधुना मद्वियोगेन क्षामच्छायं भवनं लक्षेयथाः। सूर्यापाये कमलं स्वाम् अभिख्यां न पुष्यति खलु।

९. संन्यस्ताभरणम् असकृत् दुःखदुःखेन शय्योत्सङ्गेनिहितंपेशलम् गात्रं धारयन्ती सा अबला त्वामपि नवजलमयं अस्रं अवश्यं मोचयिष्यति। प्रायः आर्द्रान्तरात्मा सर्वः करुणावृत्तिः भवति।

१०. इति आख्याते (सति) पवनतनय मैथिली इव सा उन्मुखी उत्कण्ठोच्छ्वसित हृदया त्वां वीक्ष्य सम्भाव्य च अस्मात् परं अवहिता (सती) श्रोष्यति एव। (हे) सौम्य। सीमन्तिनीनां सुहृदुपनतः कान्तोदन्तः सङ्गमात् किंचिदूनः (एव) भवति।

११. ननु बहु विगणयन् (अहं) आत्मानं आत्मना एव अवलम्बे, तत्कल्याणि! त्वम् अपि नितरां कातरत्वं मा गमः, कस्य अत्यन्तं सुखं वा एकान्ततः दुःखम् उपनतम्? (जीवन) दशा चक्रनेमिक्रमणे नीचैः उपरि च गच्छति।

१२. सौम्य! इदं मे बन्धुकृत्यं त्वया व्यवसितं कच्चित्? प्रत्यादेशात् भवतः धीरतां न कल्पयामि खलु याचितः (त्वं) निःशब्दः अपि चातकेभ्यः जलं प्रदिशसि, हि सतां प्रणयिषु ईप्सितार्थ क्रिया एव प्रत्युक्तम् (भवति)।।

## शदार्थाः टिप्पण्यश्च

| | | |
|---|---|---|
| **स्वाधिकारात्** | – | आत्मकर्त्तव्यात् (अपने कर्तव्य से) |
| **प्रमत्तः** | – | असावधान (प्रमादवश कर्तव्य विमुख) |
| **कान्ताविरहगुरुणा** | – | पत्न्या: असह्येन विरहेण (नवविवाहित पत्नी के असहनीय वियोग के कारण) कान्ताया: विरहेण गुरु: तेन (तृतीया तत्पुरुष:) |
| **अस्तङ्गमितमहिमा** | – | विनाशितदिव्यसामर्थ्य:(नष्ट प्रभाव वाला),अस्तं गमित: महिमा यस्य स:(बहुव्रीहि)। |
| **जनकतनयास्नानपुण्योदकेषु** | – | सीताकृतस्नानपवित्रजलेषु (सीता द्वारा किये गये स्नान से पवित्र किये गये जल वाले)–जनकतनयास्नानै: पुण्यानि उदकानि येषु तेषु (बहुव्रीहि समास) |
| **स्निग्धछायातरुषु** | – | घनीभूतछायावृक्षेषु (सघन छायादार वृक्षों से युक्त)–छायाप्रधाना तरव: येषु तेषु (रामगिरि का विशेषण) |
| **रामगिर्याश्रमेषु** | – | रामगिरिपर्वतस्थितेषु तपोवनेषु (रामगिरि पर स्थित तपोवन में) |
| **वसतिं** | – | निवासं, |
| **चक्रे** | – | कृतवान् (निवास किया), चक्रे–कृ, लिट्लकार आत्मनेपद प्रथम पुरुष एकवचन। |
| **धूमज्योतिःसलिलमरुताम्** | – | धूमाग्निजलवायूनाम् (धूम, अग्नि, जलवायु का)–धूमश्च ज्योतिश्च सलिलञ्च मरुच्च तेषां सर्वेषां (द्वन्द्व समास) |
| **सन्निपातः** | – | समूह: (समुदाय), सम् + नि + पत् + घञ् (भावार्थे) |
| **पटुकरणैः** | – | समर्थेन्द्रियै: (सक्षम इन्द्रियों वाले)–पटूनि करणानि येषां तै: (बहुव्रीहि समास) |
| **गुह्यकः** | – | यक्ष: (देव योनि विशेष जिसके यक्ष किन्नर, गुह्यक: अनेक नाम हैं) |
| **प्रकृतिकृपणाः** | – | स्वभावतो दीना: (स्वाभाविक रूप से दीन)– प्रकृत्या कृपण: (तृतीया तत्पुरुष:) |
| **भुवनविदिते** | – | लोकप्रसिद्धे (लोकों में प्रसिद्ध–पुष्कर आवर्तक मेघों का विशेषण) |
| **पुष्करावर्तकानाम्** | – | एतन्नामकानां प्रलयकालीनमेघानां (पुष्कर और आवर्तक नामक विशेष मेघों के) |
| **जातम्** | – | उत्पन्नम्, जन् धातु + क्त प्रत्यय |
| **मघोनः** | – | इन्द्रस्य (इन्द्र का), मघवन् (इन्द्र का नाम विशेष), षष्ठी एकवचन। |
| **कामरूपम्** | – | इच्छाधीनरूपधारिणम् (इच्छानुसार रूप धार करने वाले को) |
| **प्रकृतिपुरुषम्** | – | प्रधानपुरुषम् (प्रधान पुरुष को), प्रकृतिश्चासौ पुरुष: तम्। |

| | | |
|---|---|---|
| **दूरबन्धुः** | – | पत्नीवियुक्तः दूरे बन्धुः भार्यः यस्य सः (बहुब्रीहि समास) |
| **अर्थित्वम्** | – | याचकताम् (याचक के रूप में) |
| **अव्यापन्नाम्** | – | जीविताम् अमृतां वा (अर्थात् वियोग सहकर अभी भी जीवित है)–न व्यापन्नां–अव्यापन्नां, तां (नञ् समास), वि + आ +पद् + क्त + टाप् + द्वितीया, एक वचन |
| **अविहतगतिः** | – | अबाधितगतिः (अबाधित गति वाले तुम)–न विहता, अविहता (नञ् समास), अविहता गतिः यस्य सः, मेघः (बहुब्रीहि) |
| **सद्यःपाति** | – | सद्यःविनाशशील (शीघ्र विनाश होने के स्वभाव वाला) |
| **रुणद्धि** | – | नाशात् निवारयति (टूटने से रोक लेता है)–रुधि धातु, लट्, प्रथम पुरुष, एकवचनम् |
| **आसारप्रशमितवनोप्लव** | – | धारावृष्ट्या विनाशितः वनाग्निः (मूसलाधार वर्षा से दावाग्नि को शान्त करने वाले) दावाग्नि वनों में वृक्षों के परस्पर टकराने से लगने वाली एक विशेष अग्नि होती है, जो तेज वर्षा द्वारा ही शान्त होती है।) |
| **अध्वश्रमपरिगतम्** | – | मार्गश्रमश्रान्तम् (रास्ते की थकान से थके हुए) |
| **प्रथमसुकृतोपक्षया** | – | पूर्वकृतश्रेष्ठकार्यस्य विचारेण (पहले किये गये परोपकारादि श्रेष्ठ कार्य के विचार से) |
| **चिरविलसनात्** | – | चिरविलासाद् (देर तक चमकने के कारण) |
| **खिन्नविद्युत्कलत्र** | – | परिश्रान्तचपलाभार्यः (थकी हुयी बिजली रूपी पत्नी वाला), खिन्नं विद्युत् एव कलत्रं यस्य सः (बहुब्रीहि)। |
| **सुप्तपारावतायाम्** | – | शायितकपोतायाम् (सोये हुए कबूतरो वाली) सुप्ताः पारावताः यस्यां तस्यां (बहुब्रीहि), भवनवलभि का विशेषण। |
| **भवनवलभौ** | – | प्रासादस्य अट्टालिकायाः उपरिभागे (महल की अट्टालिका के ऊपरी भाग पर) |
| **अध्वशेषम्** | – | मार्गस्य शेषभागम् (बचे हुए मार्ग को) |
| **वाहयेत्** | – | प्रापयेत् (पूर्ण करे)–वहि प्रापणे धातु (णिच्), विधिलिङ्, प्रथम पुरुष, एक वचन |
| **अभ्युपेतार्थकृत्याः** | – | अङ्गीकृतप्रयोजनसिद्धिक्रिया, (प्रयोजन सिद्धि के दायित्व को स्वीकार कर चुकेलोग)–अभ्युपेतानि अर्थकृत्यानि यैः ते (बहुब्रीहि) |
| **न मन्दायते खलु** | – | शिथिली न भवन्ति (मन्द नहीं पड़ते अर्थात उत्साहहीन नहीं होते) |
| **वायौ सरति** | – | पवने प्रवहति सति (हवा के बहने पर) सरति–सृ+लट्+शतृ+सप्तमी एकवचन |

**सरलस्कन्धसंघट्टजन्मा** – देवदारुशाखासंघर्षणेनोत्पन्ना (देवदारु वृक्षों की शाखाओं के संघर्ष से उत्पन्न), सरलानां देवदारुणां स्कन्धानाम् शाखानां संघट्टनेन जन्मः यस्य सः।

**उल्काक्षपितचमरीबालभारः** – स्फुलिङ्गदग्धचमरीमृगकेशसमूहः (चिनगारियों से चमरीमृग के केशसमूह को जला देने वाला)

**दवाग्निः** – दावाग्निः, वनाग्निः (वन में उत्पन्न होने वाली विशेष अग्नि)

**बाधेत्** – पीडयेद् (पीड़ित करे) बाध् + विधि लिङ्, प्र.पु., एकवचन

**वारिधारासहस्त्रैः** – असंख्यजलधाराभिः (जल की हजारों धाराओं से) धाराणां सहस्त्र-धारासहस्त्रं, वारीणां धारा सहस्त्रैः (षष्ठी तत्पुरुष)

**आपन्नार्तिप्रशमनफलाः** – दुखितजनपीड़ानिवारणप्रयोजनाः (दुःखी प्राणियों की पीडा शान्त करने के प्रयोजन वाली) आपन्नानां आर्ति प्रशमनं फलं यस्याः ताः (बहुब्रीहि)

**लक्षयेथा** – अभिजानीया (पहचान लेना)

**न पुष्यति खलु** – निश्चयेन न धारयति (निश्चित ही धारण नहीं करता है।)

**संन्यस्ताभरणम्** – कृशत्वात् परित्यक्ताभूषणम् (कमजोर हो जाने के कारण परित्यक्त आभूषणों वाले), सम् + नि + अस् + क्त, संन्यस्तानि आभरणानि येन तत् (गात्र का विशेषण)

**असकृत्** – वारम्वारम् (बार-बार), न सकृत, असकृत् (नञ् समास)।

**शय्योत्सङ्गे** – पर्यङ्कमध्ये (शय्या के मध्य में)

**पेशलं गात्रम्** – स्थापितंकोमलंशरीरम् (रखे हुए कोमल शरीर को)

**अस्त्रम्** – अश्रुम् (आँसुओं को)

**मोचयिष्यति** – विसर्जयिष्यति (छोडेगी), मुच्+णिच् लृट्+प्र.पु+एकवचन।

**आर्द्रान्तरात्मा** – मृदुलहृदयः (कोमल हृदय वाला), आर्द्रः अन्तरात्मा यस्य सः (बहुब्रीहि समास)

**करुणावृत्तिः** – करुणस्वभावः (कोमल स्वभाव वाला) करुणाशीला वृत्तिः यस्य सः (बहुब्रीहि)

**इति आख्याते** – एवं प्रकारेण कथिते सति, (यक्ष के इस प्रकार कहे जाने पर)

**मैथिली इव** – सीता इव (सीता के समान), मिथिला + अण् + ङीप्

**उत्कण्ठोच्छ्वसितहृदया** – औत्सुक्येनविकसितचित्ता, (उत्कण्ठा से विकसित हृदय वाली) उत्कण्ठया उच्छ्वसितं हृदयं यस्याः सा (बहुब्रीहि समास)

**अवहिता** – सावधाना (सति), (सावधान होती हुयी) अव + धा धातु + क्त प्रत्यय + टाप्।

**सीमन्तिनीनाम्** – नारीणाम् (स्त्रियों का)

**सुहृदुपनतः** – प्रियस्य मित्र मुखेन प्राप्तः (प्रियतम के मित्र द्वारा प्राप्त)

**कान्तोदन्तः** – प्रियतमसन्देशः, कान्तस्य उदन्तः (षष्ठी तत्पुरुष)

**संगमात्** – पतिमिलनात् (पति मिलन से)

**बहु विगणयन्** – पूर्वापरं सर्वं विचारयन् (शापान्त पर ऐसा करुँगा, ऐसा बहुत विचार करता हुआ)

**नितरांकातरत्वम्** – अत्यन्त अधीरताम् (अत्यन्त अधीरता को)

**उपनतम्** – प्राप्तम्, उप + नम् + क्त

**चक्रनेमिक्रमेण** – रथाङ्गपरिपाट्या (पहिये की परिधि के समान)

**बन्धुकृत्यम्** – मित्रस्यकार्यम् (मित्र द्वारा करणीय कार्य) बन्धोः कृत्यम् (षष्ठी तत्पुरुषः)

**व्यवसितं कच्चित्** – अवश्यं करिष्यामि इति निश्चितं किम्

**प्रत्यादेशात्** – करिष्यामि इति उत्तरदानात् (करुँगा इस प्रकार के उत्तर देने को ही)

**धीरतां न कल्पयामि** – गम्भीरतां न समर्थयामि (अर्थात आप यदि उत्तर नहीं दे रहे हो तो भी मैं आश्वस्त हूँ कि आप मेरा कार्य करोगे)

**निःशब्दः अपि** – गर्जनध्वनिरहितोऽपि (गर्जना किये बिना भी)

**प्रणयिषु** – प्रार्थिजनेषु याचकेषु वा (याचना करने वालों के विषय में)

**ईप्सितार्थक्रिया** – इच्छितकार्यसम्पादनमेव (यथेष्ट कार्य का सम्पादन)

**प्रयुक्तं भवति** – प्रतिवचनम् (प्रत्युत्तर होता है– अर्थात् श्रेष्ठ लोग कार्य करने का वचन भर दें अथवा नहीं दे, कार्य करते अवश्य हैं)

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः–

१. यक्षः कियत् काल पर्यन्तम् शापितः आसीत्–

(क) एक मास पर्यन्तम् (ख) एक वर्ष पर्यन्तम्

(ग) त्रिमास पर्यन्तम् (घ) षड्मास पर्यन्तम् ( )

२. अतिकोमलं आशा बन्धः कस्य भवति–

(क) अङ्गनानाम् (ख) पुरुषाणाम्

(ग) यक्षाणाम् (घ) मेघस्य ( )

३. क्षामच्छायं भवनमधुना.........। इत्यस्मिन् पदे क्षामच्छायं कः अस्ति–

(क) यक्षः (ख) भवनम्

(ग) मेघः (घ) सूर्यः ( )

४. चातकेभ्यः जलं कः ददाति–

(क) मेघः (ख)यक्षः

(ग) इन्द्रः (घ) कुबेरः ( )

## अधोलिखितेषु रिक्तस्थानं पूरयत–

१. ..........................हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु।

२. प्राप्ते.............................भवति विमुखः किं पुनर्यस्तथोच्चैः।

३. तां कस्याञ्चिद्...........................सुप्तपारावतायाम्।

४. प्रायः सर्वो भवति...........................वृत्तिरार्द्रान्तरात्मा।

५. याच्ञा मोघा वरमधिगुणे.................लब्धकामाः।

## लघूत्तरात्मकाः प्रश्नाः –

१. दूरबन्धुर्गतः कः अस्ति?

२. केषां सम्पदः दुखितजनपीड़ा निवारणाय भवन्ति?

३. पाठे यक्षण्याः उपमा कया सह कृता?

४. मनुष्याणां कृते सुखदुःखयोः दशा किमिव भवति?

## निबन्धात्मकाः प्रश्नाः –

१. अस्य पाठस्य द्वितीय–तृतीय संख्यकानां पद्यानां सप्रसङ्ग व्याख्या कार्या।

२. पाठे प्रयुक्तानां सूक्तीनां जीवने महत्त्वं प्रतिपादयत।

३. पाठस्य एकादश द्वादश संख्यकानां पद्यानां सप्रसङ्गव्याख्या कार्या।

## व्याकरणात्मकाः प्रश्नाः –

**प्र. १ अधस्तनेषु पदेषु नामोल्लेखपूर्वकं सन्धिकार्यः –**

| | | सन्धिरूपम् | सन्धि नामः |
|---|---|---|---|
| (क) | स्व +अधिकारात् | ............................... | .................................... |
| (ख) | हि + उत्तमानाम् | ............................... | .................................... |
| (ग) | आत्मना + एव | ............................... | .................................... |

| | | | |
|---|---|---|---|
| (घ) | क्षुद्रः+अपि | ................................ | .................................... |
| (ङ) | प्रत्यादेशात् + न | ................................ | .................................... |

**प्र. २ अधस्तनपदेषु सन्धिविच्छेदो विधेयः–**

| | पदानि | सन्धि विच्छेदः |
|---|---|---|
| (क) | रामगिर्याश्रमेषु | ............................................ |
| (ख) | सुकृतापेक्षया | ............................................ |
| (ग) | पुण्योदकेषु | ............................................ |
| (घ) | ह्यङ्गनानाम् | ............................................ |
| (ङ) | यक्षश्चक्रे | ............................................ |

**प्र. ३ अधोलिखितेषु पदेषु नामोल्लेखपूर्वकं समासोविधीयताम्–**

| | पदानि | समस्तपदम् | समास नामः |
|---|---|---|---|
| (क) | कान्तायाः विरहः | ................................ | .................................... |
| (ख) | न व्यापन्नाम् | ................................ | .................................... |
| (ग) | पुष्कराश्च आवर्तकाश्च | ................................ | .................................... |
| (घ) | आम्राः कूटेषु यस्य सः | ................................ | .................................... |
| (ङ) | शोभनं हृदयं यस्य सः | ................................ | .................................... |

**प्र. ४ अधोलिखितेषु समस्तपदेषु समासविग्रहोविधीयताम्–**

| | समस्त पदं | समास विग्रहः |
|---|---|---|
| (क) | धूमज्योतिःसलिलमरुतां | ............................................... |
| (ख) | मद्वियोगः | ............................................... |
| (ग) | प्रकृतिपुरुषम् | ............................................... |
| (घ) | करुणावृत्तिः | ............................................... |
| (ङ) | चक्रनेमिः | ............................................... |

**प्र. ५ अधोलिखितेषु सुबन्तपदेषु विभक्तिः वचनञ्च निर्दिश्यताम्–**

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | भर्तुः | ................................ | .................................... |
| (ख) | प्राणिभिः | ................................ | .................................... |
| (ग) | चातकेभ्यः | ............................... | ................................... |

| | | | |
|---|---|---|---|
| (घ) | साधो | ................................ | .................................... |
| (ङ) | मूर्ध्ना | ................................ | .................................... |
| (च) | गर्जितानाम् | ................................ | .................................... |
| (छ) | एभिः | ................................ | .................................... |

**प्र. ६ निम्नलिखितानां तिङ्न्त पदानां धातुः लकारः पुरुषः वचनञ्च पृथक्-पृथक् निर्दिष्यताम्–**

| | पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | दृक्ष्यसि | ........... | ............ | ............ | .............. |
| (ख) | रुणद्धि | ........... | ............ | .............. | ............ |
| (ग) | वक्ष्यति | ........... | ............ | ............. | ............. |
| (घ) | लप्स्यते | ........... | ............ | ............ | .............. |
| (ङ) | जानामि | ........... | ............ | ............ | .............. |
| (च) | मोचयिष्यति | ........... | ............ | ............ | .............. |
| (छ) | रमसे | ........... | ............ | ............ | .............. |
| (ज) | सरति | ........... | ............ | ............ | .............. |

**प्र. ७ अधोलिखितेषु पदेषु प्रकृतिप्रत्ययोः निर्धारणं कुरुत–**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | अधिकारः | ........... | ............ |
| (ख) | जातम् | ........... | ............ |
| (ग) | भोग्यम् | ........... | ............ |
| (घ) | स्थातव्यम् | ........... | ............ |
| (ङ) | निहितम् | ........... | ............ |
| (च) | नीत्वा | ........... | ............ |
| (छ) | शमयितुम् | ........... | ............ |
| (ङ) | दृष्ट्वा | ........... | ............ |

**प्र. ८ अधोलिखितेषु पदेषु धातूपसर्गयोः निर्धारणं कुरुत–**

| | पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|---|
| (क) | प्रमत्तः | ............... | ................ | .................. |
| (ख) | सन्निपातः | ............... | ................ | .................. |

| | | | | |
|---|---|---|---|---|
| (ग) | उपनतम् | ............... | ................ | .................. |
| (घ) | विगणयन् | ............... | ................ | .................. |
| (ङ) | सम्भाव्य:. | .............. | ................ | .................. |

**प्र. ९ अधस्तनेषु वाक्येषु रेखाङ्कित पदानां शुद्धिं कुरुत-**

(क) यक्ष: **भर्तुशापात्** क्षीणप्रभाव: आसीत्।

(ख) क्षुद्रोऽपि **मित्रेण** प्राप्ते विमुख: न भवति।

(ग) मेघ: **चातकान्** जलं ददाति।

(घ) **सुर्याय** अस्तंगते कमलं न पुष्यति।

(ङ) यक्ष: **रामगिरिम्** दु:खेन जीवनं धारयति स्म।

**प्र. १० अधस्तनेषु वाक्येषु प्रश्न निर्माणं कुरुत–**

(क) ..............................................................................?

उत्तर – यक्ष रागगिरि–आश्रमेषु निवसति स्म।

(ख) ..............................................................................?

उत्तर – धूमज्योति:सलिलमरुतांसन्निपात: क्व मेघ:।

(ग) ..............................................................................?

उत्तर – सुखदु:खंचक्रनेमिक्रमेण क्रमश: नीचैरुपरि भवति।

## रचनात्मकं कार्यम्–

पाठस्थितानां पद्यानां मन्दाक्रान्ता छन्दसि सामूहिक सस्वरं गायनस्य शिक्षक सहयोगेन अभ्यासं कुरुत।

### उत्तरमाला

वस्तुनिष्ठात्मका: प्रश्ना: – १. (ख), २. (क), ३. (ख), ४. (क)

❀ ❀ ❀

# षष्ठः पाठः

# चारुत्वं चारुदत्तस्य

अस्य नाट्यांशस्य कथावस्तुनः सम्बन्धः 'शूद्रक'-विरचितस्य 'मृच्छकटिकम्' इति नामधेयस्य प्रकरणस्य प्रस्तावनायां वर्णितस्य नायकस्य चारुदत्तस्य चारित्रिकौदार्येण अस्ति। को नाम शूद्रकः? किं च तस्य स्थितिकालः? मृच्छकटिकम् तस्य कृतिरस्ति नास्ति वा? इत्यादिषु विषयेषु बहुशः विवदमानाऽपि साहित्यसमीक्षा परम्परा स्वीकरोति यत् ईशापूर्वद्वितीयशताब्द्यां उज्जयिन्यां कोऽपि कविः शूद्रको नाम राजा आसीत् 'मृच्छकटिकं' च तस्य नाट्य कृतिरस्ति। रूपकस्य नाटकादिषु दशप्रकारेषु-'मृच्छकटिकं' प्रकरण विधात्मकं रूपकमस्ति। प्रकरणस्य लक्षणानुसारं मृच्छकटिकस्य कथानकं लोकाश्रितं कवि कल्पितञ्च, प्रधानरसः शृङ्गारः नायकश्च उज्जयिन्याः दरिद्र द्विजसार्थवाहः चारुदत्तः अस्ति। द्वे नायकेऽत्र, एका कुलजा घूता अपरा च बसन्तसेना नाम गणिका।

दश-अङ्केषु विभक्तेऽस्मिन् प्रकरणे उज्जयिन्याः गुणमुग्धया गणिकया वसन्तसेनया उदारशीलदरिद्रद्विजचारुदत्तेन सह कृतस्य प्रणयं परिणयञ्च प्रामुख्येन प्रतिपादितम्। अत्रकितवद्यूतकारविटचेटशकारादीनामपि चरित्रं प्रकाशितं। एवं सामाजिकयथार्थचित्रणमाध्यमेन लोकजीवनदर्शनदृष्ट्या प्रकरणमेतत् संस्कृतनाट्यसाहित्ये अनुपमा निधि रूपेण राजते।

पाठोऽयम् मृच्छकटिकस्य नामाख्यस्य प्रकरणस्य, 'अलंकार न्यासः' इति नामकात् प्रथम अङ्कात् गृहीतः। प्रारम्भे आमुखे कृति-कृतिकारकथानकादीनां परिचयपुरस्सरं नटी सूत्रधारयोः हास-परिहासात्मकः संवाद अभिनीतः। अनन्तरं चारुदत्तस्य कृते तस्य मित्रेणं जूर्णवृद्धेन प्रेषितं प्रावारकं स्वीकृत्य विदूषकः-मैत्रेयः उपस्थितः भवति। चारुदत्तस्य मैत्रेयेण सह संवाद भवति। संवादेऽस्मिन् निर्धनता कारणात् सामाजिकजीवनव्यवहार व्यवधानविषये चारुदस्य चिन्ता गुणचारुता च प्रदर्शिता।

**अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः।**
**गुणानुरक्ता गणिका च यस्य बसन्तशोभेव बसन्त सेना।। १।।**
**तयोरिदं सत्सुरतोत्सवाश्रयं नय प्रचारं व्यवहार दुष्टतां**
**खल स्वभावं भवितव्यतां तथा चकार सर्वं किल शूद्रको नृपः।।२।।**

(परिक्रम्यावलोक्य च) अये शून्येयमस्मत्सङ्गीतशाला। क्व नु गताः कुशीलवाः भविष्यन्ति।

आ ज्ञातम्।

**शून्यमपुत्रस्य गृहं चिर शून्यं नास्ति यस्य सन्मित्रम्।**
**मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ।। ३ ।।**

कृतञ्च सङ्गीतकं मया। अनेन चिरसङ्गीतोपासनेन ग्रीष्मसमये प्रचण्डदिनकरकिरणोच्छुष्कपुष्करबीजमिव प्रचलिततारके क्षुधा ममाक्षिणी खटखटायते। तद्यावद् गृहिणीमाहूय प्रच्छामि अस्ति किमिञ्चित्प्रातराशो न वेति।

(नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

| | | |
|---|---|---|
| नटी | : | (प्रविश्य) आर्य इयमस्मि। |
| सूत्रधारः | : | आर्ये स्वागतं ते । |
| नटी | : | आज्ञापयत्वार्यः को नियोगोऽनुष्ठीयतामिति । |
| सूत्रधारः | : | आर्ये (चिरसङ्गीतोपासनेन इत्यादि पठित्वा) आर्ये, अस्ति किमप्यस्माकं गेहेऽशितव्यं न वेति ? |
| नटी | : | आर्य, सर्वमस्ति। |
| सूत्रधारः | : | किं किं अस्ति ? |
| नटी | : | तद्यथा–गुडौदनं घृतं दधिः तण्डुलाः आर्येणात्तव्यं रसायनं सर्वमस्तीति एवं तव देवा आशासन्ताम् । |
| सूत्रधारः | : | किमस्माकं गेहे सर्वमस्तीति। अथवा परिहससि। |
| नटी | : | (स्वगतम्) परिहसिष्यामि तावत् (प्रकाशम्) आर्य अस्त्यापणे । |
| सूत्रधारः | : | (सक्रोधम्) आः अनार्ये, एवं तवाशां छेत्स्यति। अभावं च गमिष्यसि । |
| नटी | : | मर्षतु मर्षत्वार्यः परिहासः खल्वेषः। |
| सूत्रधारः | : | तत्किं पुनरिदं नवमिव संविधानकं वर्तते। एका वर्णकं पिनष्टि, अपरा सुमनसो गुम्फति, इयं च पञ्चवर्ण कुसुमोपहारशोभिता भूमिः। |
| नटी | : | अद्योपवासो गृहीतः । |
| सूत्रधारः | : | किं नामधेयोऽयमुपवासः? |
| नटी | : | अभिरुपपतीनाम् । |
| सूत्रधार | : | आर्ये ! इहलौकिकोऽथवा पारलौकिकः । |
| नटी | : | आर्य पारलौकिकः । |
| सूत्रधारः | : | (सरोषम्) प्रेक्षन्तां प्रेक्षन्तामार्यमिश्राः। मदीयेन भत्तपरिव्ययेन |

पारलौकिको भर्तान्विष्यते।

नटी : आर्य, प्रसीद प्रसीद त्वमेव जन्मान्तरे भविष्यसीति।

सूत्रधारः : अयमुपवासः केन तवोपदिष्टः ।

नटी : आर्यस्येव प्रियवयस्येन जूर्णवृद्धेन ।

सूत्रधारः : (सकोपम्) आ दास्याः पुत्र जूर्णवृद्धः कदा नु खलु त्वां कुपितेन राज्ञा पालकेन नववधूकेशहस्तमिव सुगन्धं छेद्यमानं प्रेक्षिष्ये ?

नटी : प्रसीदत्वार्यः आर्यस्यैव पारलौकिकोऽयमुपवासः (इति पादयोः पतति) ।

सूत्रधारः : आर्ये, उत्तिष्ठ। कथयात्रोपवासे केन कार्यम् ?

नटी : अस्मादृशजनयोग्येन ब्राह्मणेनोपनिमन्त्रितेन ।

सूत्रधारः : अतो गच्छत्वार्या अहमप्यस्मादृशजनयोग्यं ब्राह्मणमुपनिमन्त्रयामि।

नटी : यदार्य आज्ञापयतिं (इति निष्क्रान्ता)

सूत्रधारः : (परिक्रम्य) आश्चर्यम् तस्मात्कथं मयैवं सुसमृद्धायामुज्जयिन्यामस्मादृशजनयोग्यो ब्राह्मणोऽन्वेषितव्यः। एष चारुदत्तस्य मित्रं मैत्रेय इत एवागच्छति। भवतु। प्रक्ष्यामि तावत्। अद्य मैत्रेय, अस्माकं गृहेऽशितुमग्रणीर्भवत्वार्यः।

**( नेपथ्ये )**

(भोः अन्यं ब्राह्मणमुपनिमन्त्रयतु भवान्। व्यापृत इदानीमहम्)

सूत्रधारः : आर्य, सम्पन्नं भोजनं निःसपत्नं च। अपि च दक्षिणापि ते भविष्यति।

**( पुनर्नेपथ्ये )**

भोः इदानीं प्रथमेव प्रत्यादिष्टोऽसि, तत्किं इदानीं ते निर्बन्धः पदे-पदे मामनुरोद्धुं। भवतु। अन्यं ब्राह्मणमुपनिमन्त्रय (इति निष्क्रान्तः)

**( इत्यामुखम् )**

(प्रविश्य प्रावार हस्तः)

मैत्रेय : एष चार्यचारुदत्तस्य प्रियवयस्येन जूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः सिद्धीकृतदेवकार्यस्यार्य- चारुदत्तस्योपनेतव्य इति। तद्यावदार्यचारुदत्तं पश्यामि। एष चारुदत्तः सिद्धीकृतदेवकार्यो गृहदेवतानां बलि हरन्नित एवागच्छति।

विदूषकः : (उपसृत्य) एष आर्य चारुदत्तः। तद्यावत्साम्प्रतमुपसर्पामि। (उपसृत्य) स्वस्ति भवते। वर्धतां भवान्।

चारुदत्तः : सर्वकाल मित्रं मैत्रेय प्राप्तः सखे स्वागत। आस्यताम्।

विदूषकः : यद् भवानाज्ञापयति भो वयस्य एष ते प्रियवयस्येन जूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः। सिद्धीकृतदेवकार्यस्यार्यचारुदत्तस्य त्वयोपनेतव्य इति (समर्पयति) चारुदत्तो गृहीत्वा सचिन्तः स्थितः।

विदूषक : भो किमिदं चिन्तयते ।

चारुदत्तः : वयस्य

**सुखं हि दुःखान्यनुभूय शोभते**
**घनान्धकारेष्विव दीपदर्शनम्।**
**सुखात्तु यो याति नरो दरिद्रतां**
**धृतः शरीरेण मृतः स जीवति।।४।।**

विदूषकः : भो वयस्य अलं सन्तपितेन। प्रणयिजनसंक्रमित विभवस्यसुरजनपीतशेषस्य प्रतिपच्चन्द्रस्येव परिक्षयोऽपि तेऽधिकतरं रमणीयः।

चारुदत्तः : वयस्य न ममार्थन्प्रति दैन्यं । पश्य।

**एतत्तु मां दहति यद्गृहमस्मदीयं,**
**क्षीणार्थमित्यतिथयः परिवर्जयन्ति।**
**संशुष्कसान्द्रमदलेखमिव भ्रमन्तः,**
**कालात्यये मधुकराः करिणः कपोलम्।।५।।**

विदूषकः : भो वयस्य एते खलु दास्याः अर्थकल्यवर्ता वरटाभीताः इव गोपालदारका अरण्ये यत्र यत्र न खाद्यन्ते तत्र तत्र गच्छन्ति।

चारुदत्तः : वयस्य

**सत्यं न मे विभवनाशकृतास्तिचिन्ता,**
**भाग्यक्रमेण हि धनानि भवन्ति यान्ति।**
**एतत्तु मां दहति नष्ट धनाश्रयस्य**
**यत्सौहृदादपि जनाः शिथिली भवन्ति।।६।।**

अपि च –

**दारिद्र्याद्धियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो**
**निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।**
**निर्विण्ण शुचमेति शोकपिहितो बुदध्या परित्यज्यते,**
**निर्बुद्धिः क्षयमेत्यहो निर्धनता सर्वापदामास्पदम्।।७ ।।**

विदूषकः : भो वयस्य, तमेवार्थकल्यवर्तं स्मृत्वालं संतापितेन ।

चारुदत्तः : वयस्य कृतो मया गृहदेवताभ्यो बलिः। गच्छ। त्वमपि चतुष्पथे मातृभ्यो बलिमुपहर।

विदूषकः : न गमिष्यामि ।

चारुदत्तः : किमर्थम्

विदूषकः : यत् एवं पूज्यमाना अपि देवता न ते प्रसीदन्ति। तत्को गुणो देवष्वर्चितेषु ।

चारुदत्तः : वयस्य मा मैवम्। गृहस्थस्य नित्योऽयं विधिः।

**तपसा मनसा वाग्भिः पूजिता बलिकर्मभिः।**
**तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः।।८ ।।**

भवतु। तिष्ठ तावत्। अहं समाधिं निवर्तयाभि।

❀ ❀ ❀

## पद्यानामन्वयः–

१ अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः चारुदत्तः किल (आसीत्), बसन्तशोभेव बसन्तसेना (नामिका) गणिका च यस्य गुणानुरक्ता (आसीत्)।

२. तयोः सत् सुरतोत्सवाश्रयं नयप्रचारं, व्यवहारदुष्टतां, खलस्वभावं, तथा भवितव्यतां च सर्वं शूद्रकः (नाटककारः) चकार।

३. अपुत्रस्य गृहं शून्यं, यस्य सन्मित्रं नास्ति (तस्य) चिरंशून्यं, मूर्खस्य दिशः शून्याः, दरिद्रस्य सर्वं शून्यम् (अस्ति)।

४. (मित्र!) घनान्धकारेषु दीपदर्शनं इव दुःखान्यनुभूय हि सुखं शोभते। तु (किन्तु) यो नरः सुखात् दरिद्रतां याति सः शरीरेण घृतः (अपि) मृतः (इव) जीवति।

५. भ्रमन्तः मधुकराः कालात्यये संशुष्कसान्द्रमदलेखं करिणः कपोलम् इव यद् अतिथयः क्षीणार्थमिति अस्मदीयं गृहं परित्यजन्ति, एतत्तु मां दहति।

६. सत्यं विभवनाशकृता मे चिन्ता नास्ति। (यतः) हि घनानि (तु) भाग्यक्रमेण भवन्ति यान्ति (च)।

नष्टधनाश्रयस्य (मम) सौहृदादपि जनाः शिथिली भवन्ति एतत्तु मां दहति।

७. दारिद्रयात् ह्रियमेति, ह्रीपरिगतः तेजसः प्रभ्रश्यते, निस्तेजाः परिभूयते, परिभवात् निर्वेदमापाद्यते, निर्विण्ण शुचमेति, शोकपिहित बुद्ध्या परित्यज्यते, निर्बुद्धिः क्षयमेति, अहो ! निर्धनता सर्वापदामास्पदम्।

८. तपसा, मनसा, वाग्भिः बलिकर्मभिश्चपूजिता देवताः शमिनां नित्यं तुष्यन्ति। (अतः) विचारितैः किं (प्रयोजनम्)।

## शब्दार्थाः टिप्पण्यश्च

**द्विज सार्थवाहः** – वाणिज्यपरः ब्राह्मणः (ब्राह्मण व्यापारी), सार्थं वणिक समूहं वहति नयति इति सार्थवाहः (उपपद समास), द्विजश्च असौ सार्थवाहश्च– द्विजसार्थवाहः (कर्मधारय समास)।

**सुरतोत्सवाश्रयं** – नयप्रचार–आनन्दोत्सवाधारितं नीतिव्यवहारम् (आनन्दोत्सव पर आधारित नीति व्यवहार) सुरतोत्सवं परस्पर प्रगाढप्रेमजन्यआनन्दः एव आश्रयः आधारः यस्य (बहुब्रीहि समास), तादृशं नय प्रचारं नीतिव्यवहारः।

**व्यवहारदुष्टताम्** – विवादविचारसदोषताम् (न्यायालयादि विभिन्नव्यवहार सम्बन्धी विकृतियों को) व्यवहारस्य दुष्टता– व्यवहारदुष्टता तां (षष्ठी तत्पुरुषः समास)।

**खलस्वभाव** – शकारदीनांधूर्तानां–स्वभावम् (इस रूपक में वर्णित शकारादि धूर्त पात्रों के चरित्र–चित्रण के माध्यम से दुष्टों का स्वभाव भी वर्णित है)

**चकार किल्** – निश्चयेन रचितवान् (रचना की है)

**कुशीलवाः** – नटाः (अभिनेता), नटाचारणाश्च कुशीलवाः इत्यमरः।

**अपुणस्य** – पुत्रहीनस्य (पुत्रहीन का) न पुत्रः – अपुत्रः तस्य (नञ् समास)

**सङ्गीतकम्** – नृत्यगीतवाद्यकानां समाहारः (नृत्यगीतवाद्यादि का संयुक्त रूप– नृत्य गीतं तथा वाद्यं सङ्गीतकमुच्यते)

**प्रचण्डदिनकरकिरणो–च्छुष्कपुष्करबीजमिव** – अतितप्तसूर्यकिरणशुष्ककमलबीजमिव (प्रचण्ड सूर्य की तप्त करणों से सुखाये गये कमल बीज के समान)–प्रचण्डः यः दिनकरः (कर्मधारय समास), तस्य किरणैः शुष्कं कृतं पुष्कर बीजम् कमलबीजम् इव (कर्मधारय, तत्पुरुष )

**प्रचालिततारिके** – चञ्चलपुतलिके (चञ्चल पुतलियों वाली)

**ममाक्षिणी** – मम नेत्रौ (मेरी आँखें)

**प्रातराशो** – प्रात:काले करणीयं अल्पाहार (प्रात:कालीन अल्पाहार:)

**गुडौदनम्** – गुडेनमिश्रितम् ओदनम् (गुडमिश्रित भात)

**रसायनम्** – सरसभोज्यम् (सरस भोज्य, पेय इत्यादि)

**नियोगः** – कर्तव्य (करने योग्य कार्य)

**आशितव्यम्** – भोजनयोग्यम् (खोन योग्य), अश् + तव्यत्

**देवा आशासन्ताम्** – प्रसादविषयीकुर्वन्तु (देवता आशीर्वाद प्रदान करें)

**संविधानकम्** – आयोजनम् (कार्यक्रम)

**प्रियवयस्येन** – प्रियमित्रेण (आत्मीय मित्र द्वारा)

**वर्णकम्** – सुगन्धित द्रव्यम्

**व्यापृतः** – कार्यान्तरेषु व्यस्त: (अन्य कार्यों में लगा हुआ)

**प्रत्यादिष्टः** – निषिद्ध: (मना कर दिया गया है)

**निबन्र्धः** – दुराग्रह: (बार-बार हठपूर्वक आग्रह)

**आमुखः** – प्रस्तावना (आमुख या प्रस्तावना रूपक का पारिभाषिक शब्द है। आमुख के अन्तर्गत संक्षेपत: कथावस्तु का कथन या सङ्केत किया जाता है। आमुख में सूत्रधार के साथ नट, विदूषक या पारिपार्श्विक पात्रों का संक्षिप्त और नाटकीय संवाद होता है, उस संवाद से ही भावी घटनाओं तथा कथानक की सूचना मिल जाती है। (साहित्य दर्पण ६-३१-६२) प्रस्तावना पाँच प्रकार की होती है उनमें से यहाँ प्रयोगातिशय नामक प्रस्तावना भेद है। प्रयोगातिशय भेद वहाँ होता है जहाँ एक प्रसंग को छोड़कर दूसरा प्रसङ्ग उपस्थित कर दिया जाता है, उसी से पात्र का प्रवेश होता है। यहाँ निमन्त्रण के लिए ब्राह्मण अन्वेषण की घटना से ही चारुदत्त के मित्र मैत्रेय का प्रवेश है)।

**जातिकुसुमवासितः** – जातिनामकपुष्पै: सुगन्धित:

**प्रावारकः** – उत्तरीयं वस्त्रम्

**प्रणयिजनसंक्रमितविभवस्य**– प्रियजनसमर्पितसमृद्धे: (प्रियजनों के लिए अपनी समृद्धि का समर्पण करने वाले आपका)–प्रणयिजनेभ्य: संक्रमितं विभव: येन तादृशस्य चारुदत्तस्य (बहुब्रीहि)

**सुरजनपीतशेषस्य** – देवपानशेषस्य (देवताओं के पी लेने से शेष)

**प्रतिपच्चचन्द्रस्येव** – प्रतिपदाया: तिथे चन्द्रस्येव (प्रतिपदा तिथि के चन्द्र के समान)

**परिक्षयोऽपि** – क्षीणता (चन्द्रस्य पक्षे) निर्धनता वा (चारुदत्तस्य पक्षे)

**भ्रमन्तः मधुकराः** – इतस्तत: गन्छन्त: भ्रमरा: (इधर उधर दौड़ने हुए भ्रमर)

| | | |
|---|---|---|
| **कालात्यये** | – | मदजलस्यसमयेव्यतीते (मदजल का समय बीत जाने पर) |
| **संशुष्कसान्द्रमदलेख** | – | शोषप्राप्तसघनदानराजिम् (सूखी हुयी गहरी मदलेखा वाले) संशुष्का सान्द्रा मदलेखा यस्य तादृशं करिणम् (हाथी के कपोल पर उसके ही बहते हुए मदजल से एक रेखा बन जाती है, जिसको मदलेखा, दानराजि, मदपंक्ति आदि नामों से जाना जाता है। मद की न्यूनता होने पर वह मदलेखा सूख जाती है) |
| **क्षीणार्थम्** | – | नष्टधनम् (निर्धन को) क्षीणं अर्थं यस्य तादृशम् (बहुब्रीहि समास) |
| **अर्थकल्यवर्ताः** | – | अर्थाः कल्यवर्ता इव (प्रातःकालीन अल्पाहार के समान अल्पकाल तक ही भोग सुख प्रदान करने वाले तुच्छ–धनादि |
| **वरटाभीता इव गोपालदारकाः** | – | बर्र से डरे हुए ग्वालों के समान |
| **विभवनाशकृता** | – | धनक्षयेण–उत्पन्ना (धन के विनाश से उत्पन्न) |
| **नष्टधनाश्रयस्य** | – | नष्टसमृद्धेः (नष्ट समृद्धि वाले से) धनं एवं आश्रयं यस्य–धनाश्रयः (बहुब्रीहि) नष्टं धनाश्रयं यस्य तादृशस्य (बहुब्रीहि समास) |
| **सौहृदादपि** | – | मैत्रीभावादपि (मित्रता से भी) |
| **शिथिली भवन्ति** | – | विमुखाः भवन्ति (मुँह मोड़ लेते हैं) |
| **दारिद्र्याद्ध्रियमेति** | – | निर्धनत्वात् ह्रियं लज्जां एति प्राप्नोति (निर्धनता से लज्जित होता है) |
| **ह्रीपरिगतः** | – | लज्जितः–ह्रिया परिगतः (तृतीया तत्पुरुष) |
| **तेजसः** | – | आत्मप्रतापात् प्रभावात् वा (आत्म तेज से अथवा स्वाभिमान भाव से) |
| **प्रभ्रश्यते** | – | प्रभ्रष्टो भवति, निस्तेजः भवति इत्यर्थः (तेजहीन हो जाता है) |
| **परिभूयते** | – | तिरस्क्रियते–(तिरस्कृत हो जाता है)। |
| **परिभवात्** | – | तिरस्कारात् (तिरस्कार से) |
| **निर्वेदम्** | – | ग्लानिम् (ग्लानि को) |
| **आपाद्यते** | – | प्राप्नोति (प्राप्त करता है) |
| **निर्विण्णः** | – | ग्लानि प्राप्तः– (निर् + विद् + क्त) |
| **शोकपिहितः** | – | शोकयुक्तः |
| **सर्वापदामास्पदम्** | – | सर्वासां विपदां कारणम् (सभी प्रकार की आपदाओं का स्थान या कारण) |
| **वाग्भिः** | – | वचनैः स्तुति पाठैः वा (स्तुतियों से), वाक् तृतीया बहुवचनम्। |
| **बलिकर्मभिः** | – | पूजोपचारैः (पूजा के कार्यों तथा साधनों से) |
| **शमिनाम्** | – | शान्तचित्तानां (शान्ति से युक्त चित्तवालों का) |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

(१) दरिद्रस्य कृते शून्यं अस्ति–
(क) गृहं (ख) दिशं
(ग) नगरं (घ) सर्वम् ( )

(२) अवन्तिपूर्यां गणिका आसीत् –
(क) वसन्त सेना (ख) रदनिका
(ग) मदनिका (घ) धूता ( )

(३) चारुदत्तस्य मित्रम् आसीत्
(क) माढव्यः (ख) वसन्तकः
(ग) मैत्रेयः (घ) स्थावरकः ( )

(४) जूर्णवृद्धेन कस्य कृते जातीकुसुमवासितः प्रावारको प्रेषितः–
(क) विदूषकस्य (ख) चारुदत्तस्य
(ग) शर्विलकस्य (घ) सूत्रधारस्य ( )

(५) सुखं कम् अनुभूय शोभते –
(क) दुःखम् (ख) संतोषम्
(ग) ग्रीष्मम् (घ) लाभम् ( )

### अतिलघूत्तरात्मकाः प्रश्नाः –

(१) दरिद्र ब्राह्मणस्य किं नाम?
(२) चारुदत्तः कुत्र निवसति स्म?
(३) जूर्णवृद्धेन चारुदत्तस्य कृते किं प्रेषितः?
(४) कः जनः धृतः शरीरेण मृतवत् जीवति?
(५) सर्वापदां स्थानम् किम् ?

### लघूत्तरात्मकाः प्रश्नाः –

(१) वसन्तसेना कं स्नेहं करोति ?
(२) केन विना गृहं शून्य भवति ?
(३) कालात्यये संशुष्कसान्द्रमदलेखेव के करिणः कपोलम् परिवर्जयन्ति ?
(४) घनान्धकारे कस्य दर्शनम् शोभते ?
(५) नष्ट धनाश्रयस्य जनाः कस्मात् भावात् शिथिलीभवन्ति ?

## अधोलिखित प्रश्नानां उत्तरं विस्तरेण लिखत–

१. सुखं हि दुःखान्यनुभूय शोभते, घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु याति यो नरः दरिद्रतांः, धृतः शरीरेण मृतः स जीवति ।।
अस्य पद्यस्य व्याख्यां कुरुत।

२. चारुदस्य दरिद्रता–विषये विचारान् लिखत ?

३. अहो निर्धनता सर्वापदामास्पदम्? पङ्क्त्याः भावं सोदाहरणं लिखत।

## व्याकरण प्रश्नाः–

**(१) अधोलिखित शब्दानां सन्धिविच्छेद कृत्वा नामोल्लेखं कुरुत–**

| | पदम् | सन्धि विच्छेदः | नामः |
|---|---|---|---|
| (क) | गुणानुरक्ता | ..............+................ | ...................... |
| (ख) | शोभेव | ..............+................ | ...................... |
| (ग) | सुरतोत्सवाश्रयम् | ..............+................ | ...................... |
| (घ) | एषोऽस्मि | ..............+................ | ...................... |
| (ङ) | खल्वेषः | ..............+................ | ...................... |
| (च) | कुसुमोपहारः | ..............+................ | ...................... |
| (छ) | मयैव | ..............+................ | ...................... |

**(२) अधोलिखित शब्दानां समास विग्रहं कृत्वा नामोल्लेखं कुरुत–**

| | समस्त पदम् | समास विग्रहः | नामः |
|---|---|---|---|
| (क) | गुणानुरक्ताः | ...................... | ...................... |
| (ख) | गुडौदनं | ...................... | ...................... |
| (ग) | कुसुमोपहारः | ...................... | ...................... |
| (घ) | जातीकुसुमवासितः | ...................... | ...................... |
| (ङ) | दुःखान्यनुभूय | ...................... | ...................... |
| (च) | विभवनाशः | ...................... | ...................... |
| (छ) | सर्वापदामास्पदम् | ...................... | ...................... |
| (ज) | गृहदेवताभ्यः | | |

**( ३ ) अधोलिखितशब्दानां उपसर्ग-प्रकृति-प्रत्ययः लिखत–**

| | शब्दः | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|---|
| (क) | उपदिष्टः | ...................... | ...................... | ...................... |
| (ख) | संवृत्तः | ...................... | ...................... | ...................... |
| (ग) | प्रविश्यः | ...................... | ...................... | ...................... |
| (घ) | उपनेतव्यः | ...................... | ...................... | ...................... |
| (ङ) | अन्वेषितव्य | ...................... | ...................... | ...................... |
| (च) | निर्दिष्टः | ...................... | ...................... | ...................... |
| (छ) | परिक्रम्य | ...................... | ...................... | ...................... |
| (ज) | निर्विण्णः | ...................... | ...................... | ...................... |
| (झ) | परिगतः | ...................... | ...................... | ...................... |

**( ४ ) अधोलिखित शब्दानां विभक्तिः वचनञ्च लिखत–**

| | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | मया | ...................... | ...................... |
| (ख) | गेहे | ...................... | ...................... |
| (ग) | तव | ...................... | ...................... |
| (घ) | केन | ...................... | ...................... |
| (ङ) | वृद्धेन | ...................... | ...................... |
| (च) | मित्रम् | ...................... | ...................... |
| (छ) | वाग्भिः | ...................... | ...................... |
| (ज) | अस्माद् | ...................... | ...................... |
| (झ) | तेषु | ...................... | ...................... |

**( ५ ) अधोलिखितधातूनां लकार-पुरुष-वचनञ्च लिखत–**

| | पदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (क) | पृच्छामि | ...................... | ...................... | ...................... |
| (ख) | अस्ति | ...................... | ...................... | ...................... |
| (ग) | हसिष्यामि | ...................... | ...................... | ...................... |
| (घ) | छेत्स्यति | ...................... | ...................... | ...................... |
| (ङ) | पतति | ...................... | ...................... | ...................... |

(च) शोभते ...................... ...................... ......................

(छ) पश्य ...................... ...................... ......................

(ज) गच्छन्ति ...................... ...................... ......................

(झ) तिष्ठ ...................... ...................... ......................

**(६) अधोलिखित-अव्ययानां प्रयोगं कृत्वा वाक्य निर्माणं कुरुत–**

| अव्ययः | वाक्यः |
|---|---|
| (क) किल | ................................................................................ |
| (ख) कदा | ................................................................................ |
| (ग) नु | ................................................................................ |
| (घ) अपि | ................................................................................ |
| (ङ) एव | ................................................................................ |
| (च) अधः | ................................................................................ |
| (छ) तावत् | ................................................................................ |
| (ज) भो | ................................................................................ |

**(७) अधोलिखित वाक्यानां शुद्ध रूपं पुनः लिखत–**

१. ................................................................................

स्वस्ति भवान्।

२. ................................................................................

अलं सन्तापस्य ।

३. ................................................................................

वयस्य न मम अर्थस्य प्रति दैन्यम्।

४. ................................................................................

त्वम् गच्छतु।

५. ................................................................................

एष आर्य चारुदत्तः।तावत् अहं उपसर्पति।

**उत्तरमाला–**

वस्तुनिष्ठात्मकाः प्रश्नाः –१. घ  २. क  ३. ग  ४. ख  ५. क

# सप्तमः पाठः
# नन्दिनी कथा

**( रघुवंशमहाकाव्यम्-द्वितीयसर्गाधारितम् )**

महाकविः कालिदासः संस्कृतसाहित्ये अप्रतिमकवि रुपेण आद्रियते। कवेरस्य स्थितिः काल ख्रीस्तपूर्वप्रथमशताब्दौ स्वीक्रियते। कविरस्य जन्मस्थान-वंश-जीवनविषये विद्वांसः विवदमानाः अपि जनश्रुतिभिः, अनुमानैः, तस्य रचनासाक्ष्यैश्च स्वीकुर्वन्ति यत् कवेरस्य जन्मः ब्राह्मणवंशेऽभवत्, उज्जयिनी तस्य वासभूमिरासीत्। महाकविरयं भारतीयसंस्कृति-साहित्य-जीवन्दर्शनानाञ्च प्रतिनिधिकविरूपेण राजते।

कालिदासस्य काव्ये काव्योचितभावगाम्भीर्यं - प्रेमाभिव्यक्ति-प्रकृतिचित्रणं - शास्त्रोचित भव्यतौदार्यं रसछन्दालङ्कारादीनि काव्यकलानिकषानि प्रतिमानानि च अतिशयेन फलितानि। कालिदासः वैदर्भी-रीति-प्रयोगेऽन्यतमः, उपमाऽर्थान्तरन्यासालङ्कार प्रयोगे तस्य प्रतिभा वैलक्षण्यं स्वीकुर्वद्भिः समीक्षकैः तस्य प्रशस्ति-'उपमाकालिदासस्य' इत्याभाणकेन स्वीकृता। अयं कविः विद्वद्समाजे 'कविताकामिनीविलासः', 'दीपशिखा' इत्यादिभिः उपाधिभिः बहु सम्मानितास्ति। किं बहुना तस्य विलक्षण-वर्णननैपुण्यं अद्भुताञ्च काव्यशैलीं संवीक्ष्य एव समीक्षकैः उच्यते यत्-

**पुरा कवीना गणनाप्रसङ्गे कनिष्ठिकाधिष्ठतः कालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती वभूव ।।**

अस्य महाकवेः साम्प्रतं सप्त रचनाः समुपलभ्यन्ते। (क) महाकाव्यद्वयं- (१) रघुवंशम् (२) कुमारसंभवम्। (ख) नाट्यग्रन्थाः त्रयः- (३) अभिज्ञानशाकुन्तलम् (४) विक्रमोर्वशीयम् (५) मालविकाग्निमित्रम् (ग) गीतकाव्यद्वयम्- (६) मेघदूतम् (७) ऋतु संहारम्।

एकोनविंशति-सर्गात्मकं रघुवंशमहाकाव्यं कालिदासस्य महत्तमं महाकाव्यम्। कालिदासस्य कवित्व-प्रतिभा-भारतीयसंस्कृतेरभिव्यक्तिश्च यादृशीरघुवंशे तादृशी अन्यत्र दुर्लभैव। अस्य ग्रन्थस्य वैलक्षण्यादेव कविरयं 'रघुकारः' इति नाम्ना विश्रुतः।

अस्य पाठस्य मूल स्रोतः रघुवंशमहाकाव्यस्य द्वितीयसर्गे वर्णिता रघुवंशप्रदीपस्य दिलीपस्य गोसेवावृत्तस्य कथानकमस्ति। सन्तानहीनो स भूपतिः स्वकुलगुरोः वशिष्ठस्य आदेशात् कामधेनोः पुत्र्याः नन्दिन्याः सेवां कृतवान्। तस्यैव कृपया रघुनामकं पुत्रं लब्धवान्। उपाख्यानेऽस्मिन् अस्माकं देशे शासकानां गोभक्तिः, तपोवृत्तिः सांस्कृतिक मूल्यान् प्रति श्रद्धाश्च वर्णिताः।

आसीत् पयोधिपर्यन्तपृथ्वीप्रशासकः इक्ष्वाकुवंशोद्भवः लोकललामः दिलीपो नाम भूपतिः, मगधराजपुत्री सुदक्षिणा तस्य सहधर्मचारिणी चासीत्। कुलगुरुवशिष्ठस्य त्रिकालदर्शिनः परामर्शं प्रसादमेति मत्वा सन्तानहीनो स सम्राट् पुत्रप्राप्तीच्छया कामिन्यासुदक्षिणया सह-आत्मानं कामधेनुप्रसूतेः नन्दिन्याः सेवायां नियोजितवान्।

एकदा प्रभाते गुरोराज्ञया स प्रजाधिपः गन्धमाल्यादिभिः स्वपत्न्या सम्पूजितां पीतप्रतिबद्धवत्सां तां धेनुं वनाय मुक्तवान्। पवित्रपांसुमार्गमनुगच्छतां दयितां निवर्त्य धीरः स नृपः शरीररक्षार्थमनुयायिवर्गमपि न्यषेधयन् एवं उक्तवान्-

**न चान्यतस्तस्य शरीर रक्षा स्ववीर्य गुप्ता हि मनोप्रसूतिः।**

नन्दिन्यनुचरो स सम्राट् विविधैः तत्सन्तुष्टिकरैरुपायैः तस्याः सपर्यायामनुरक्तो अभवत्। स कदाचित् रसवद्भिः तृणैः कदाचित् कण्डूयनैः दंश निवारणैः स्वच्छन्दगमनैश्च तां सेवितवान्। भूपतिरसौ जातः पूर्णानुचरो नन्दिनी व्यवहाराणां। तद्यथा-

**स्थितः स्थितामुच्चलितः प्रयातां,**
**निषेदुषीमासनबन्धधीरः।**
**जलाभिलाषी जलमाददानां,**
**छायेव तां भूपतिरन्वगच्छत्॥**

सा नन्दिनीं प्रतिदिनं दिवसपर्यन्तम् स्वपरिभ्रमणेन दिगन्तराणि पूतानि विधाय सायंकाले वशिष्ठाश्रमं प्रत्यावर्तमाना अपि तेन मध्यमलोकपालेनानुगता धर्मानुष्ठानतोषिता साक्षात् श्रद्धेव शोभते स्म। राज्ञः धर्मपत्न्यपि वशिष्ठधेनोरनुयायिनं तं वनान्तात् आवर्तमानं निर्निमेषलोचनाभ्यामवलोकयन्ती तृप्तिं न लेभे। अहो दिव्यमेतत् दृश्यं भवति स्म तदानीं प्रत्यावर्तनकालस्य-

**पुरस्कृता वर्त्मनि पार्थिवेन,**
**प्रत्युद्गतापार्थिवधर्मपत्न्याः।**
**तदन्तरे सा विरराजधेनुः**
**दिनक्षपामध्यगतेव सन्ध्या॥**

साक्षतपात्रहस्ता सुदक्षिणा प्रतिसायं प्रत्युद्गतां तां प्रणम्यार्थसिद्धेः द्वारमिवास्याः शृङ्गान्तरं पूजयति स्म। सा पयस्विन्यपि स्तिमिता सती तां सपर्यां स्वीकरोति स्म। भक्त्योपपन्नेषु तद्विधानां प्रसाद चिह्नानि पुरःफलानि भवन्तीति मत्वा तौ दम्पती परमानन्दमलभेताम्। सान्ध्यविधिं समाप्य तौ प्रतिदिनं दोहावसाने निषण्णां तां दोग्ध्रीं प्रतिदिनं असेवेताम्। रात्रावपि तामन्तिकन्यस्तबलिप्रदीपां सम्पूज्य गृहिणीसहायः दिलीपः समुपविष्टां तामनूपविश्य क्रमेण यथाक्रमं सुप्तां शयनमभजत्। प्रातःकाले सुप्तोत्थितायां तस्याम् उत्थितवान्। इत्थं प्रजार्थं गोसेवावृत्तं पालयतः करुणावतारस्य तस्य धीरस्यैकविंशति दिनानि व्यपगतानि।

द्वाविंशे दिने सा मुनिहोमधेनुः आत्मानुचरस्यभावं जिज्ञासमाना हिमालयगुहायां प्रविष्टवती। नन्दिनी मनसापि हिंस्रैः न कदापि दमनीया इत्यवगत्य स राजा अद्रिशोभादर्शने तत्परोऽभवत्। तदन्तरे अलक्षिताभ्युत्पतनः मृगेन्द्रैकः तां नन्दिनी बलादाकृष्य वधाय प्रवृत्तः। तदाक्रान्दितं श्रुत्वा नगेन्द्रासक्तां

दृष्टिमाकृष्य स राजा यदा गां विलोकयति स्म तदा गविस्थितमेकं केसरिणमपश्यत्।

सहसा शरण्यः स मृगेन्द्रगामी मृगेन्द्रवधाय निषङ्गाच्छरमुद्धर्तुमैच्छत्। तस्य दक्षिणकरसायकपुङ्खेसक्ताङ्गुलिः अभवत्। विबृद्धमन्युः स धनुर्धरः पुरःस्थितमप्यागस्कृतं न किंचिदपि कुर्वाणो स्वतेजोभिरन्तः अतप्यत्। तं सिंहोरूसत्वं विस्मितं विस्मापयन् सिंहः मनुष्यवाचा एवमुक्तवान् –



**अलं महीपाल! तव श्रमेण,**
**प्रयुक्तमप्यस्तिमितोवृथा स्यात्।**
**न पादपोन्मूलन शक्ति रहः**
**शिलोच्चये मूर्च्छति मारुतस्य।।**

पुनश्च पुरोदृश्यमाणमेकं देवदारुं प्रति सङ्केतं विधाय सिंहोपुनरवदत् यत् अहं भगवतावृषभध्वजेन पुत्रीकृतस्यास्य देवदारोः सुरक्षार्थं अङ्कागतसत्ववृत्तिः सिंहत्वं विधाय नियुक्तः कुम्भोदरनामः अष्टमूर्तेः किङ्करोऽस्मि। एषा मम बुभुक्षितस्य तृप्त्येव परमेश्वरेणोपस्थापिता। राजन्! गुरुंप्रति दर्शितशिष्यभक्तिर्भवान् लज्जां विहाय निवर्तस्व यतोहि कृते प्रयत्ने शस्त्ररक्ष्यस्य रक्षणे विफले जातेऽपि शस्त्रभृतां यशः न क्षिणोति। एवं मृगाधिराजस्य प्रगल्भं वचो निशम्य सः पुरुषाधिराजः पुनरुवाच– हे! मृगेन्द्र। सत्यम् चराचराणां सर्गस्थितिप्रत्यवहारहेतोर्भगवतः शिवस्य शासनं मयाऽपि शिरसा धार्यः किन्तु मम गुरोः घनेदमपि नोपेक्षणीयमिति मन्ये। अस्त्येकरुपायः आवयोरुभयोः ध्येयसिद्धेः। तच्चास्ति, यत् भवान् दिनावसानोत्सुकबालवत्सां गामिमां विसृज्य विकल्पेन मदीयेन देहेन स्ववृत्तिं साधयतु। एतत् श्रुत्वा किञ्चित् विहस्य निर्मितभीतिः स भूतेश्वरपार्श्ववर्ती पुनरुक्तवान्–

**एकातपत्रं जगतः प्रभुत्वं,**
**नवं वयः कान्तमिदं वपुश्च ।**
**अल्पस्य हेतोर्बहुहातुमिच्छन्,**
**विचारमूढः प्रतिभासि मे त्वम् ।।**

अन्यच्च प्रजानाथ। प्राणिपरित्राणभावादपि प्राणोत्सर्गः त्वया नोचितः यतो हि तव नाशे सति गौरेका स्वस्तिमती भवेत् परं जीविते सति तु भवान् असंख्यप्रजानां संरक्षको भविष्यतीति। कोटिशः धेनुददता भवता गुरुक्रोधोऽपि अपनेयोऽस्ति। स्वर्गोपमे ते राज्ये भूतले सति त्वया स्वर्गकामना पुनः कथं नु करणीया? अतो हि रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मंदेहम्। निशम्येतत् देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच–

**क्षतात् किल त्रायत इत्युदग्रः,**
**क्षत्रस्य शब्दः भुवनेषु रूढः ।**
**राज्येन किं तद्विपरीत वृत्तेः**
**प्राणैरूपक्रोशमलीमसैर्वा ।।**

अन्यच्च मृगेन्द्र। रुद्रौजसा भवता आक्रान्तेयं सौरभेयी। नास्याः कोऽपि विकल्पः गुरोः क्रोधोऽपनेतुम्। तद् भवानेव आत्मवत् सेवकस्य पारतन्त्र्यं विचार्य एकान्तविध्वंसिनं मदीयं शरीरं स्वीकृत्य मे यशःशरीरे दयालु भव। एवं बहुशः प्रणयवचोभिः प्रार्थितः स सिंहः राज्ञः प्रस्तावं स्वीकृतवान्। तदा न्यस्तशस्त्रः भूपालः स्वदेहं आमिषपिण्डमिव हरये समर्पितवान् तस्योग्रमाक्रमणं च प्रतीक्षते स्म। तदन्तरे अधोमुखस्य प्रजावत्सलस्योपरि विद्याधरैः मुक्त हस्तैः सुमनवृष्टिः कृता। नन्दिन्यपि उक्तवती– उत्तिष्ठ, वत्स! उत्तिष्ठ निशम्येतत् अमृतायमानं वचः उत्थितः सन् राजा स्वामग्रतः जननीमिव गामेवापश्यत् न तु सिंहम्। तं विस्मितं धेनुरुवाच साधो! अलं चिन्तया मयैव कपट सिंहत्वं कल्पयित्वा तव परीक्षार्थमेतत् सर्वं कृतं, नास्त्यत्र कोऽपि भूतार्थः। प्रीतास्म्यहं ते गुरौ भक्त्या मय्यनुकम्पया च। वरं वृणीस्व। राजा वंशस्य कर्तारमनन्तकीर्तिं तनयं च सुदक्षिणायां ययाचे।

तथैवेति प्रतिश्रुत्य सा कामदुधा तमाज्ञापितवती यत् पुत्राभिलाषी त्वं मदीयं पयः पत्रपुटे दुग्ध्वा पिब। एवं तयादिष्टः सः सविनयं पुनरुवाच–

**वत्सस्य होमार्थ विधेश्चशेष–**
**मृषेरनुज्ञामधिगम्य मातः ।**
**उधस्यमिच्छामि तवोपभोक्तुं**
**षष्ठांशमूर्व्या इव रक्षितायाः ।।**

एवं विज्ञापिता सा पयस्विनी प्रीतितरा जाता। तदा उभावेव गौरीगुरोगह्वराद् सानन्दं वशिष्ठाश्रमं प्रत्यागतौ। ज्ञातवृत्तस्य गुरोरनुमतिमधिगम्य सद्वत्सलो स राजा वत्सहुतावशेषं नन्दिनी– पयः प्रीत्या पीतवान्। अपरेद्यु वशी वशिष्ठः सपत्नीकं तं राजधानीं प्रति प्रस्थापयामासः एवं सुखेन राज्यधुरं धारयतः तस्य प्रजापालकस्य जायायां नन्दिनीप्रसादात् रघोरुदारशीलस्य पुत्रस्य जन्मः अभवत्। धन्येयं संस्कृतिः गोसम्वर्द्धिनी। धन्यास्ते भूपालाः तयोः समुपासकाः।

❀ ❀ ❀

## पद्यानामन्वयः

१. भूपतिः तां स्थितां स्थितः (सन्) प्रयाताम् उच्चलितः (सन्) निषेदुषीम् आसनबन्धधीरः जलम् आददानाम् जलाभिलाषी (सन्) छाया इव अन्वगच्छत्।

२. वर्त्मनि पार्थिवेन पुरस्कृता, पार्थिवधर्मपत्न्या प्रत्युद्गता सा धेनुः तदन्तरे दिनक्षपामध्यगता सन्ध्या इव विरराज।

३. महीपाल! तव श्रमेण अलं, इतः प्रयुक्तं अपि अस्त्रम् वृथा स्यात्। हि पादपोन्मूलनशक्ति मारुतस्य रहः शिलोच्चये न मूर्च्छति।

४. एकातपत्रं जगतः प्रभुत्वं नवं वयः इदं कान्तं वपुश्च (इत्येव) बहु अल्पस्य हेतोः हातुम् इच्छन् त्वम् मे विचारमूढः प्रतिभासि।

५. उदग्रः क्षत्रस्य शब्दः क्षतात् त्रायते इति भुवनेषु रुढः (अस्ति) किल तद्विपरीत वृत्तेः जनस्य राज्येन किं उपक्रोशमलीमसैः प्राणैः वा किम्।।

६. हे मातः ! वत्सस्य होमार्थविधेश्च शेषं तव उधस्यं रक्षितायाः ऊर्व्याः षष्ठांशमिव त्रऋषे अनुज्ञाम् अधिगम्य उपभोक्तुम् इच्छामि।

## शब्दार्थाः टिप्पण्यश्च

**पयोधिपर्यन्तपृथ्वीप्रशासकः** – सागरं यावत् विस्तीर्णां धरित्र्याः समर्थः राजा (सागर तक फैली हुयी पृथ्वी का सक्षम सार्वभौम सम्राट)

**लोकललामः** – भुवनश्रेष्ठः (लोक में श्रेष्ठ) लोकेषुललामः (षष्ठी तत्पुरुषः)

**सहधर्मचारिणी** – धर्मपत्न्या सह, धर्मं चरतीत्यर्थे, सह + धर्म + चर् + णिनि प्रत्यय।

**कामधेनुप्रसूतेः** – कामधेनोः सन्ततिः (कामधेनु नामक गाय की सन्तान अथवा पुत्री)

**गन्धमाल्यादिभिः** – चन्दनमालादिभिः पूजनद्रव्यैः (चन्दनमालादि पूजन उपचारों से)

**पवित्रपांसुमार्गमनुगच्छता** – पवित्ररेणुमार्गप्रचलिताम् (पवित्र धूल वाले मार्ग में अनुगमन करते हुए), पवित्रा पांसवः यस्य तं मार्गम् अनुगच्छताम् (बहुब्रीहि समासः)

**दयिताम्** – प्रियां भार्यां सुदक्षिणाम् (आत्मीया पत्नी सुदक्षिणा को)

**निवर्त्य** – परावर्त्य (लौटाकर) निर् +वृत् + ल्यप्।

**धीरः** – धैर्ययुक्तः मनस्वी वा (जो विपरीत परिस्थितियों में भी अपने कर्तव्य में उत्साहित रहता है, उसे धीर कहते हैं)।

**अनुयायिवर्गम्** – सेवकसमूहम् (सेवक समुदाय को), अनुयान्तीति अनुयायिनः, तेषां वर्गः।

| | | |
|---|---|---|
| **मनोःप्रसूतिः** | – | मनोः नामकस्य आद्यस्य राज्ञः सन्ततिः मनुष्यः इत्यर्थ। |
| **स्ववीर्यगुप्ता** | – | स्वपराक्रमसंरक्षिता (अपने स्वयं के पुरुषार्थ से संरक्षित) |
| **नन्दिन्यनुचरः** | – | नन्दिन्याः सेवकः (नन्दिनी का सेवक) |
| **सम्राट्** | – | सार्वभौमराजा (सम् + राज् + क्विप् प्रत्यय) शास्ति यश्चाज्ञया राज्ञः सः |
| **सपर्यायाम्** | – | सेवायाम् (सेवा में) |
| **कण्डूयनैः** | – | खर्जनैः (खुजलाने के द्वारा) कण्डू + यक् + ल्युट् + तृतीया बहुवचन। |
| **दंशनिवारणैः** | – | वनमक्षिकादिदूरीकरणैः (पशु को काटने वाले बड़े मच्छर आदि को भगाकर) |
| **प्रयातां** | – | प्रस्थिताम् (प्रस्थान करने वाली को) प्र + या + क्त + टाप् |
| **निषेदुषीम्** | – | उपविष्टाम् (आरामपूर्वक बैठी हुयी को) नि + सद् + क्वसु + ङीप् |
| **प्रत्यावर्तमाना** | – | प्रत्यागच्छमाना (लौटती हुयी) प्रति + आ + वृत् + शानच् + टाप् |
| **मध्यमलोकपालेन** | – | पृथ्वीपालकेन (सात ऊर्ध्व लोक तथा सात अधोलोकों वाले चतुर्दशलोकात्मक भुवन मण्डल में पृथ्वी लोक मध्यम लोक है)। |
| **र्निनिमेषलोचनाभ्याम्** | – | अपलकनेत्राभ्याम् (अपलक नेत्रों से) निर्गतानि निमेषानि ययोः ते लोचने (बहुब्रीहि समास) ताभ्याम्। |
| **वर्त्मनि** | – | मार्गे (मार्ग में) वर्त्मन् शब्द, सप्तमी एकवचन। |
| **पार्थिवेन** | – | पृथ्वीपालकेन (पृथ्वीपालक राजा द्वारा) पृथिवी + अण् = पार्थिवः। |
| **पुरस्कृता** | – | अग्रेकृता (आगे की गयी) |
| **प्रत्युद्गता** | – | स्वागतार्थम् अग्रतः आगत्य आदृता (स्वागतार्थ आदरपूर्वक अगवानी की गयी)। |
| **दिनक्षपामध्यगतेवसन्ध्या** | – | दिनरात्रिमध्यप्राप्ता सन्ध्या इव (दिन और रात के बीच में उपस्थित सन्ध्या के समान) (दिनश्चरात्रिश्च) तयोः मध्यगता सन्ध्या इव। |
| **विरराज** | – | सुशोभितवती (सुशोभित हुई) वि+राज्, लिट्, प्रथम पुरुष, एकवचन। |
| **साक्षतपात्रहस्ता** | – | अक्षतादिपूजनोपकरणपात्रहस्ता (अक्षत–चावल, कुंकुम आदि पूजनसामग्री के पात्र से युक्त हाथ वाली), सुदक्षिणा इत्यभिप्रायः। |
| **पयस्विनी** | – | प्रशस्तदुग्धा (विशुद्ध गुणकारीदूधदेने वाली) पयस् + विनि + ङीप् (ई) |
| **स्तिमिता** | – | निश्चला (निश्चला होकर), स्तिम्+ क्त (त)+ इडागम (इ) + टाप् (आ) |
| **भक्त्योपपन्नेषु** | – | भक्त्या अनुराग युक्तेषु (पूज्य जनों के प्रति अनुराग युक्त जनों के विषय में) उपपन्नेषु= उप + पद् + क्त + सप्तमी, बहुवचन। |
| **प्रसादचिह्वानि** | – | प्रसन्नताचिह्वानि (प्रसन्नता सूचक चिह्व) |

**पुरःफलानि** – अभीष्टफलप्राप्तिसूचकानि (यथेष्ट फलप्राप्ति के सूचक)

**निषण्णाम** – सुखोपविष्टाम् (सुखपूर्वक बैठी हुयी), नि+ सद् +क्त + टाप्।

**दोग्ध्रीम्** – दोहनशीलाम् (दोह ली गयी)–दुह्+ तृच् (तृ)+ ङीप् (ई)

**तामन्तिकन्यस्तबलिप्रदीपा** – समीपस्थस्थापित पूजोपहारदीपाम् तां नन्दिनीम् (जिसके पास पूजा की सामग्री एवं प्रज्वलित दीपक तथा भोज्य पदार्थ रखे गये हैं), अन्तिकं न्यस्ताः बलिप्रदीपाः यस्याः ताम् नन्दिनीम् (बहुव्रीहि समास)

**गृहिणीसहायः** – पत्नीसहायः (पत्नी के साथ) गृहिणी सहाया यस्य (बहुब्रीहि)।

**व्यपगतानि** – व्यतीतानि (व्यतीत हो गये)।

**आत्मानुचरस्य भावम्** – स्वसेवकस्य निष्ठाम् (अपने सेवक की निष्ठा को)

**जिज्ञासमाना** – ज्ञातुम् इच्छन्ती (जानने की इच्छा करती हुयी), जिज्ञास +शानच्।

**दमनीया** – आक्रमण योग्या (आक्रमण करने योग्य)

**अवगत्य** – विचार्य (सोचकर), अव + गम् + ल्यप्।

**अद्रिशोभादर्शने** – पर्वतस्य सुषमा अवलोकने (पर्वत की सुन्दरता देखने में)

**अलक्षिताभ्युत्पतनः** – अदृष्टाभिमुखाक्रमणः (जिसके सामने से किये गये आक्रमण का पता ही नहीं चला), अलक्षितः अभ्युत्पतनः यस्य तादृशः सिंहः।

**आक्रन्दितम्** – आर्तनादम् (करुणाभरी चीत्कार को)।

**नगेन्द्रासक्ताम्** – पर्वतसंलग्नाम् (पर्वत पर टिकी हुयी), नगानां पर्वतानां इन्द्रः, नगेन्द्रः हिमालयः इत्यर्थः तस्मिन् आसक्तां संलग्नाम् (दृष्टेः विशेषणम्)

**शरण्यः** – शरणागतवत्सलः (शरणागत के लिए कोमल हृदय)

**मृगेन्द्रगामी** – सिंहवत् गमनशीलः (सिंह के समान चाल वाला)

**निषङ्गाद्** – तूणीराद् (तरकस से)

**उद्धर्तुम्** – निष्कासयितुम् (निकालने के लिए) उत् + हृ + तुमुन्।

**सायकपुङ्खे** – बाणमूले (बाण की जड़ में)

**सक्ताङ्गुलिः** – संलग्नाङ्गुलिः (चिपकी हुयी उँगलियों वाला)

**विवृद्धमन्युः** – समुद्दीप्तक्रोधः (बढ़े हुए क्रोध वाला)

**आगस्कृतम्** – अपराधिनम् (अपराधी को), आगं अपराधं करोति इति आगस्कृत्।

**स्वतेजोभिः** – आत्मदीप्त्यैः (अपने अन्त तेज से), तेजस् तृतीया बहुवचन।

**सिंहोरूसत्त्वम्** – सिंहेवविपुलमनोबलशीलम् (सिंह के समान अपराजेय मनोबल से युक्त) सिंह इव उरु विपुलं सत्त्वं मनोबलं यस्य तादृशं दिलीपम्।

**महीपालः** – भूपालः (राजा), महीं पालयतीति महीपालः (उपपद समास)।

**पादपोन्मूलनशक्तिरहः** – बालवृक्षोत्खननशक्तिवेगः (छोटे वृक्षों को उखाड़ने की शक्ति से युक्त वेग वाला), पादपानां उन्मूलनं पादपोन्मूलनं, पादपोन्मूलने एव शक्ति रहः वेगं यस्य सः वायु।

**शिलोच्चये** – शिलानां उच्चये पर्वते इत्यर्थः (शिला समूह अर्थात् पर्वत पर)

**वृषभध्वजेन** – शङ्करेण (शिव द्वारा) वृषभस्य ध्वजा यस्य तेन (बहुब्रीहि)

**पुत्रीकृतस्य** – पुत्ररूपे स्वीकृतस्य (पुत्र स्वीकार किये गये मेरे लिए)

**अङ्कागतसत्ववृत्तिः** – समीपागतप्राणि जीवनोपायः (पास आये हुए प्राणियों से जीविका चलाने वाला) अङ्के आगतानि यानि सत्वानि तैरेव वृत्तिः यस्य।

**अष्टमूर्ते** – शिवस्य (अष्टमूर्ति शिव का), अष्ट मूर्तयः यस्य इति अष्टमूर्तिः कालिदास ने जल,वायु, अग्नि, आकाश, पृथ्वी, सूर्य, चन्द्रमा और यजमान (सृष्टि रूपी यज्ञ में कर्तव्यनिष्ठ प्राणी), इन आठ प्रकृति तत्त्वों को शिवरूप मानकर शिव को अष्टमूर्ति कहा है।

**प्रगल्भम्** – गर्वोक्तिपूर्णम् (धृष्टता और अहङ्कार युक्त)

**सर्गस्थितिप्रत्यवहारहेतुः** – जन्मपालनविनाशहेतुः (उत्पत्ति, पालन एवं विनाश के कारण), सर्गश्च स्थितिश्च प्रत्यवहारश्च तेषां हेतुः (द्वन्द्व समास)।

**दिनावसानोत्सुकबालवत्साम्** – दिनान्तोत्सुकबालवत्साम् (सन्ध्या के समय पर आतुर बछड़े वाली नन्दिनी को), दिनस्य अवसाने–दिनावसाने (षष्ठीतत्पुरुषः), दिनावसाने उत्सुकः बाल वत्सः यस्याः तां नन्दिनीम् (बहुब्रीहि समास)।

**निर्मितभीतिः** – उत्पन्नभयः (भय उत्पन करने वाला) – निर्मिता भीतिः भयम् येन।

**भूतेश्वर पार्श्ववर्ती** – शिवसमीपवर्ती (शिव का समीपवर्ती), भूतानां प्राणीनां ईश्वरः,

**एकातपत्रम्** – एकछत्राधिपत्यम् (एकछत्र स्वामित्व)।

**हातुम्** – त्यक्तुम् (छोड़ने के लिए)

**विचारमूढः** – कर्त्तव्याकर्त्तव्यविचारणेमूर्खः (कर्त्तव्याकर्त्तव्य के चिन्तन में असमर्थ)

**प्राणिपरित्राणभावादपि** – प्राणिरक्षाविचारादपि (प्राणियों की रक्षा के विचार से भी)

**प्राणोत्सर्गः** – प्राणत्यागः, प्राणानाम् उत्सर्गः (षष्ठी तत्पुरुषः)

**भोक्तारम्** – भोग कर्तारम्, भुज् + तृच् + द्वितीया एकवचनम्।

**ऊर्जस्वलम्** – ऊर्जासम्पन्नं, बलवन्तम् वा

**उदग्रः** – उन्नतशील (प्रतिष्ठित)

**क्षतात्** – पीडाभिः (पीड़ाओं से)

**उपक्रोशमलीमसैः** – लोकनिन्दाकलुषितैः (लोकनिन्दा से कलुषित या निन्दित प्राणों से)

| | | |
|---|---|---|
| **रुद्रौजसा** | – | शिवप्रभावेण (शिव के प्रभाव से) |
| **सौरभेयी** | – | सुरभेः सन्ततिः (सुरभि की सन्तान नन्दिनी) |
| **एकान्तविध्वंसिनम्** | – | अनिवार्यतः विनाशशीलम् (अनिवार्यतः क्षण भंगुर) |
| **प्रणयवचोभिः** | – | प्रेमपूर्वक वचनैः (प्रेमपूर्वक वचनों से) |
| **आमिषपिण्डमिव** | – | माँसकवलमिव (माँस के कवल के समान) |
| **अमृतायमानम्** | – | अमृतसमानं (अमृत के समान मधुर वचन) |
| **कल्पयित्वा** | – | रचयित्वा (बनाकर) |
| **भूतार्थः** | – | परमार्थः (वास्तविक तथ्य) |
| **कामदुधा** | – | सर्वकामनापूरयित्री (सभी कामनाओं को पूर्ण करने वाली) |
| **वत्सस्यहोमार्थविधे च शेष** | – | वत्सपीतं होमानुष्ठानेन अवशिष्टञ्च( बछड़े के दूध पी लेने तथा होमानुष्ठान से बचे हुए |
| **उधस्यम्** | – | दुग्ध, उधांसि भव (दूध को) |
| **ऊर्व्याः** | – | पृथिव्याः (धरती का) |
| **गौरीगुरोगह्वराद्** | – | हिमालयगुहायाः (हिमालय की गुफा से)-गौर्या-पार्वत्याः, पितु गुरोः- पितुः, गह्वराद्, गुहायाः। |
| **प्रस्थापयामासः** | – | प्रेषितवान् (विदा किया)। |
| **राज्यधुरम्** | – | राज्यदायित्वम् (राज्य के दायित्व को) |

## अभ्यासः

### वस्तुनिष्ठात्मकाः प्रश्नाः-

(१) दिलीपस्य सहधर्मचारिणी आसीत्-

(क) नन्दिनी (ख) सुदक्षिणा

(ग) कामिनी (घ) सन्ततिः ( )

(२) दिलीपस्य परीक्षार्थं नन्दिनी हिमालयगुहायां प्रविष्टवती-

(क) एकविंशतितमे दिवसे (ख) द्वाविंशे दिवसे

(ग) त्रयोविंशतितमे दिवसे (घ) विंशतितमे दिवसे ( )

(३) पाठेऽस्मिन् भूतेश्वरपार्श्ववर्ती विशेषणं अस्ति–

(क) शिवस्य (ख) सिंहस्य

(ग) राज्ञः (घ) भूतानाम् ( )

(४) अस्मिन् पाठे 'मनुष्यदेवः' इत्यस्य शब्दस्य प्रयोगः अस्ति–

(क) रूपकम् (ख) उपमा

(ग) श्लेषः (घ) यमकम् ( )

## अधोलिखितेषु रिक्त स्थानं पूरयत–

१. स्ववीर्य गुप्ता हि .................................... ।

२. राजा गविस्थितमेकं .................................. अपश्यत्।

३. ...................................... प्रतिभासि मे त्वम्।

४. क्षतात् किल ......................................... इत्युदग्रः।

५. प्रजावत्सलस्योपरि ........................... मुक्तहस्तैः सुमनवृष्टिः कृताः।

## लघूत्तरात्मकाः प्रश्नाः–

१. राजा दिलीपः छायेव काम् अन्वगच्छत्?

२. सर्गस्थितिप्रत्यवहार हेतुः कः अस्ति ?

३. दिलीपः आमिषपिण्डमिव सिंहाय किं समर्पितवान् ?

४. मातुः दुग्धे प्रथमाधिकारः कस्य भवति ?

५. नन्दिनी प्रसादात् कस्य जन्मः अभवत् ?

## निबन्धात्मकाः प्रश्नाः–

१. पाठस्थितयोः प्रथम–द्वितीयपद्ययोः सप्रसङ्गव्याख्या विधेया ।

२. चतुर्थ–पञ्चमयोः सप्रसङ्गव्याख्या विधेया।

३. अस्यपाठस्य भारतीयसंस्कृतिदृष्ट्या महत्त्वं लिखत।

## व्याकरणात्मकाः प्रश्नाः–

**१. अधोलिखितेषुपदेषु नामोल्लेखपूर्वकं सन्धिकार्यः–**

| | सन्धिः | सन्धि नाम |
|---|---|---|
| (क) नन्दिनी + अनुचरः | .................................. | .................................. |

| | | | |
|---|---|---|---|
| (ख) | भक्त्या + उपपन्नेषु | .................................. | .................................. |
| (ग) | रात्रौ + अपि | .................................. | .................................. |
| (घ) | तृप्ति + एव | .................................. | .................................. |
| (ङ) | प्रजा + अधिप | .................................. | .................................. |
| (च) | भूपतिः + असौ | .................................. | .................................. |
| (छ) | भवन्ति + इति | .................................. | .................................. |
| (ज) | अस्ति + एकः | .................................. | .................................. |
| (झ) | आवयोः + उभयोः | .................................. | .................................. |

२. **अधस्तनेषु पदेषु सन्धिविच्छेदं विधेयः–**

| | पदम् | सन्धि विच्छेदः |
|---|---|---|
| (क) | प्राप्तीच्छया | ............. + ................ |
| (ख) | गुरोराज्ञया | ............. + ................ |
| (ग) | भूपतिरन्वगच्छत् | ............. + ................ |
| (घ) | पयस्वन्यपि | ............. + ................ |
| (ङ) | श्रद्धेव | ............. + ................ |
| (च) | दिगन्तराणि | ............. + ................ |
| (छ) | तामनूपविश्य | ............. + ................ |
| (ज) | नोपेक्षणीयम् | ............. + ................ |

३. **अधोलिखितेषु रिक्तस्थानानि पूरयन्तु–**

| | समस्तपदम् | समासविग्रहः | समासस्य नाम |
|---|---|---|---|
| (क) | ....................... | मगधस्य राजा | ............................ |
| (ख) | प्रतिदिनम् | ..................................... | ........................... |
| (ग) | प्रजार्थम् | ..................................... | ........................... |
| (घ) | ....................... | मृगेन्द्र इव गमनं यस्य | ........................... |
| (ङ) | अष्टमूर्तिः | अष्ट मूर्तयः यस्य सः | .......................... |
| (च) | ...................... | चराणाम् च अचराणाम् च | द्वन्द्वः |

| | | | |
|---|---|---|---|
| (छ) | प्राणोत्सर्गः | ...................................... | तत्पुरुषः |
| (ज) | ...................... | भूतानाम् ईश्वरः | ........................... |

४. **अधोलिखितेषु सुबन्तप्रयोगेषु रिक्त स्थानानि पूरयन्तु–**

| | पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | त्रिकालदर्शिनः | ............. | षष्ठी | एकवचनम् |
| (ख) | कामिन्या | कामिनी | ............. | एकवचनम् |
| (ग) | ............... | आत्मन् | द्वितीया | एकवचनम् |
| (घ) | वनाय | वन | ............. | ............ |
| (ङ) | ............... | दयिता | द्वितीय | एकवचनम् |
| (च) | व्यवहाराणाम् | ............ | ............. | ............ |
| (छ) | मनसा | मनस् | तृतीया | ............... |
| (ज) | ............... | अस्मद् | षष्ठी | द्विवचनम् |
| (झ) | सुदक्षिणायाम् | ............... | ............... | एकवचनम् |

५. **निम्नलिखितानां भूतकालिक रूपाणां वर्तमानकालिकं रूपं लिखत–**

| | भूतकालिकः | वर्तमानकालिकः |
|---|---|---|
| **(क)** | **आसीत्** | **अस्ति** |
| (ख) | अभवत् | ....................... |
| (ग) | शोभते स्म | ....................... |
| (घ) | भवति स्म | ....................... |
| (ङ) | अलभेताम् | ....................... |
| (च) | ऐच्छत् | ........................ |
| (छ) | अपश्यत् | ........................ |

६. **अधोलिखितेषु प्रकृतिप्रत्यययोः निर्धारणं कुरुत–**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | मत्वा | ............... | ............... |
| (ख) | मुक्तवान् | ............... | ............... |

| | | | |
|---|---|---|---|
| (ग) | उक्तवान् | ............... | ............... |
| (घ) | जातः | ............... | ............... |
| (ङ) | स्थितः | ............... | ............... |
| (च) | हातुम् | ............... | ............... |
| (छ) | दमनीया | ............... | ............... |
| (ज) | धार्यः | ............... | ............... |
| (झ) | दुग्ध्वा | ............... | ............... |

**७. अधोलिखितेषु धातूपसर्गप्रत्यययानां निर्धारणं कुरुत–**

| | पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|---|
| (क) | अनुरक्तः | ............... | ............... | ............... |
| (ख) | निवर्त्य | ............... | ............... | ............... |
| (ग) | प्रत्यावर्तमानाः | ............... | ............... | ............... |
| (घ) | अवलोकयन्ती | ............... | ............... | ............... |
| (ङ) | समाप्य | ............... | ............... | ............... |
| (च) | अनूपविश्य | ............... | ............... | ............... |
| (छ) | प्रतिश्रुत्य | ............... | ............... | ............... |
| (ज) | अधिगम्य | ............... | ............... | ............... |
| (झ) | विज्ञापिता | ............... | ............... | ............... |

**८. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां शुद्धिः विधेया–**

(क) राजा दिलीपः सुदक्षिणायाः सह नन्दिन्याः सेवकः अभवत्।

(ख) अलं महीपाल तव श्रमस्य।

(ग) राजा गुरोः प्रति दर्शितभक्तिः आसीत्।

(घ) अल्पस्य हेतुः बहु हातुमिच्छन् त्वं विचारमूढः असि।

(ङ) राजा सिंहम् प्राणान् दत्तवान्।

**९. अधस्तनेषु वाक्येषु कोष्ठकाङ्कितशब्दात् प्रारभ्य प्रश्न निर्माणं कुरुत–**

(क) दिलीपः नन्दिन्याः सेवां कृतवान्।

..........................................................? (कस्याः)

..........................................................? (कः)

(ख) नन्दिनी एकदा हिमालय गुहायां प्रविष्टवती।

..............................................................?(कुत्र)

..............................................................?(का)

(ग) पुरुषाधिराजः मृगाधिराजमवदत्।

..............................................................?(कः)

..............................................................?(कम्)

(घ) राजा ऋषेः आज्ञां अधिगम्य नन्दिन्याः दुग्धं पीतवान्।

..............................................................?(कस्य)

..............................................................?(कस्याः)

(ङ) सुदक्षिणायां नन्दिनीप्रसादात् रघोः जन्मः अभवत्।

..............................................................?(कस्याः)

..............................................................?(कस्य)

## रचनात्मकं कार्यम्

१. अस्मिन् पाठे आगतानां राज्ञः, पत्न्याः गोः सिहस्य च वाचकान् पदानि चित्वा तेषामर्थभेदं लिखत।

**उत्तरमालाः –**

वस्तुनिष्ठात्मकाः प्रश्नाः– १. ख, २. ख, ३. ख, ४. क

# अष्टमः पाठः
# यक्ष-युधिष्ठिरयोः संवादः

महर्षिणा वेदव्यासेन विरचितं 'महाभारतम्' इति नामधेयं महाकाव्यं 'विश्वकोषः' इति नाम्ना प्रसिद्धः। अस्य महाकाव्यस्य वैशिष्ट्यविषये उक्तं यत् 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' अर्थात् अस्मिन् महाकाव्ये यद् वर्णितं तत् अन्यत्र दृश्यते किन्तु यद् अत्र नास्ति तत्तु अन्यत्र कुत्रापि नोपलभ्यते।

विशालकलेवरेऽस्मिन् महाकाव्ये एकलक्षपरिमितं श्लोकाः सन्ति। अत एव अस्य अपरं नाम 'शतसाहस्री संहिता' इत्यपिमन्यते। अस्मिन् महाकाव्ये अष्टादशपर्वाणि सन्ति, एतेषु पर्वेषु कौरव-पाण्डवानां युद्धवर्णनेन सहैव अनेकानि आख्यानोपाख्यानि समाविष्टानि सन्ति। उपाख्यानेषु च कर्मनिष्ठा-ईश्वरभक्तिः-लोकजीवनस्य विविधविषयाणाञ्च सम्यक् चित्रणमस्ति। भारतीयसंस्कृतौ समाजे च वाल्मीकिरामायणवत् अस्य महाकाव्यस्यापि वैशिष्ट्यं विद्यते।

अस्मिन् अध्याये सङ्कलितांशः महाभारतस्य वनपर्वतः गृहीतोऽस्ति। आरण्यकपर्वणः एकस्मिनाख्याने अस्य कथानकस्य वर्णनं विद्यते। पाण्डवाः वनवासकाले यदा द्वैतवने न्यवसन् तदानीम् एकस्मिन् दिवसे एकस्य ब्राह्मणस्य वृक्षोपरिस्थितं अरणीमन्थनकाष्ठं मृगस्य शृङ्गे प्रविष्टम्। मृगश्च तं नीत्वा पलायितः। एतद् दृष्ट्वा सः ब्राह्मणः पाण्डवान् न्यवेदयत्। तदा पाण्डवाः तं मृगम् अन्वगच्छन् प्रयासाधिक्येनापि ते तं हन्तुं न शक्नुवन्। अन्ते च ते गहनारण्ये पिपासा पीड़िताः सञ्जाताः तदा युधिष्ठिरस्य आज्ञां सम्प्राप्य सर्वप्रथमः नकुलः जलस्य अन्वेषणं कर्तुम् अगच्छत्।

जलाशयं प्राप्य यदा सः जलं पातुम् उद्यतोऽभवत् तदानीं तत्र एकः यक्षः समागत्य कथयति यत् 'मे प्रश्नानाम् उत्तरं प्रदाय एव जलं पिबतु इति' किन्तु नकुलः यक्षस्य प्रश्नानामुत्तरं प्रदानं विना जलं पातुं यदा उद्यतोऽभवत् तदा सः मूर्छितः सञ्जातः। एतदनन्तरं क्रमशः सहदेवस्य, अर्जुनस्य, भीमस्यापि सैव स्थितिः सञ्जाता। तदन्तरं युधिष्ठिरः स्वयमागत्य भ्रातॄन् जीवनप्रदानानन्तरम् एव अहं जलं स्वीकरिष्यामि इति यक्षम् अकथयत्। यक्षः तस्य भ्रातृन् जीवनदानम् अयच्छत्। अयमेव अंशः अत्र पाठरूपेण निर्धारितः। एषः प्रश्नोत्तरात्मकः संवादः नूनं ज्ञानवर्द्धकः चारित्रिक शिक्षया च संयुक्तः वर्तते।

**स ददर्श हतान् भ्रातॄँल्लोकपालानिव च्युतान्।**
**युगान्ते समनुप्राप्ते शक्रप्रतिमगौरवम् ।। १ ।।**

**बुद्ध्या विचिन्तयामास वीराः केन निपातिताः।**
**गाहमानश्च तत् तोयमन्तरिक्षात् स शुश्रुवे।। २ ।।**



यक्ष उवाच–

इमे ते भ्रातरो राजन् वार्यमाणा मया सकृत्।
बलात् तोयं जिहीर्षन्तस्ततो वै मृदिता मया।। ३ ।।

पार्थ ! मा साहसं कार्षीर्मम पूर्वपरिग्रहः।
प्रश्नानुक्त्वा तु कौन्तेय! ततः पिब हरस्व च।। ४ ।।

युधिष्ठिर उवाच–

न चाहं कामये यक्ष तव पूर्वपरिग्रहम्।
यथाप्रज्ञं तु ते प्रश्नान् प्रतिवक्ष्यामि पृच्छ माम्।। ५ ।।

यक्ष उवाच–

किंस्विदावपतां श्रेष्ठं किंस्विन्निवपतां वरम्।
किंस्वित् प्रतिष्ठमानानां किंस्वित् प्रसवतां वरम् ।। ६ ।।

युधिष्ठिर उवाच–

वर्षमावपतां श्रेष्ठं बीजं निवपतां वरम्।
गावः प्रतिष्ठमानानां पुत्रः प्रसवतां वरम् ।। ७ ।।

यक्ष उवाच–

इन्द्रियार्थाननुभवन् बुद्धिमाँल्लोकपूजितः।
सम्मतः सर्वभूतानामुच्छ्वसन् को न जीवति।। ८ ।।

युधिष्ठिर उवाच–

देवतातिथिभृत्यानां पितृणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन् न स जीवति।। ९ ।।

यक्ष उवाच–

किंस्विद् गुरुतरं भूमेः, किंस्विदुच्चतरं च खात्।
किंस्विच्छीघ्रतरं वायोः, किंस्विद् बहुतरं तृणात् ।। १० ।।

युधिष्ठिर उवाच–

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात् ।। ११ ।।

यक्ष उवाच–

किंस्वित्प्रवसतो मित्रं, किंस्विन्मित्रं, गृहे सतः।
आतुरस्य च किं मित्रं, किंस्विन्मित्रं मरिष्यतः।। १२ ।।

युधिष्ठिर उवाच–

सार्थः प्रवसतो मित्रं, भार्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं, दानं मित्रं मरिष्यतः ।। १३ ।।

यक्ष उवाच–

कः शत्रुर्दुर्जयः पुंसां, कश्च व्याधिरनन्तकः।
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः।। १४ ।।

युधिष्ठिर उवाच–

क्रोधः सुदुर्जयः शत्रुर्लोभो, व्याधिरनन्तकः।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।। १५ ।।

यक्ष उवाच–

कोऽहङ्कार इति प्रोक्तः कश्च दम्भः प्रकीर्तितः।
किं तद् दैवं परं प्रोक्तं किं तत् पैशुन्यमुच्यते ।। १६ ।।

युधिष्ठिर उवाच–

महाज्ञानमहङ्कारो, दम्भो धर्मो ध्वजोच्छ्रयः।
दैवं दानफलं प्रोक्तं, पैशुन्यं परदूषणम्।। १७ ।।

यक्ष उवाच–

**व्याख्याता मे त्वया प्रश्ना याथातथ्यं परन्तप।**
**तस्मात् त्वमेकं भ्रातृणां, यमिच्छसि स जीवतु ।। १८ ।।**

युधिष्ठिर उवाच–

**आनृशंस्य परो धर्मः परमार्थाच्च मे मतम्।**
**आनृशंस्यं चिकीर्षामि नकुलो यक्ष ! जीवतु।। १९ ।।**

यक्ष उवाच–

**तस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम्।**
**तस्मात् ते भ्रातरः सर्वे जीवन्तु भरतर्षभ! ।। २० ।।**

## शब्दार्थाः

| | | |
|---|---|---|
| **युगान्तेः** | = | प्रलयकाले (प्रलय काल में) |
| **शक्रप्रतिमगौरवम्** | = | इन्द्र के सामन गौरवशाली, |
| **निपातिताः** | = | गिराया, |
| **ददर्श** | = | दृश् धातु लिट् लकार, प्रथम पुरुष, एकवचन (देखा) |
| **आहमाने** | = | प्रविष्ट होते हुए, |
| **तोयम्** | = | जलम् (पानी) |
| **वार्यमाना** | = | रोके जाते हुए, |
| **पूर्व परिग्रहः** | = | पहले से अधिगृहीत वस्तु, |
| **हरस्व** | = | ले जाओ, |
| **कामये** | = | चाहता हूँ, |
| **प्रतिवक्ष्यामि** | = | प्रत्युत्तर दूंगा, |
| **आवपताम्** | = | कृषि करने वालों को, |
| **निवपताम** | = | बौने वालों को, |
| **खात्** | = | गगनात् (आकाश से), |
| **वातात्** | = | वायु से |
| **बहुतरी** | = | अत्यधिक |
| **प्रवसत्** | = | प्रवासी का |

| | | |
|---|---|---|
| **किंस्वित्** | = | क्या |
| **सतः** | = | रहते हुए का |
| **आतुरस्य** | = | आतुर शब्द षष्ठी एकवचन (रोगी का) |
| **मरिष्यतः** | = | मरने वाले का |
| **अनन्तकः** | = | असाध्य |
| **दम्भः** | = | कपटाभिमान |
| **दैवम्** | = | भाग्यम् (भाग्य) |
| **पैशुन्यम्** | = | चुगलखोरी |
| **ध्वजा** | = | पताका |
| **आनुवंशस्यम्** | = | दया तथा समता भाव को |
| **यथातथ्यम्** | = | ठीक से |
| **चिकीर्षामि** | = | करना चाहता हूं |
| **भरतर्षभ** | = | भारत वर्ष में श्रेष्ठ , भरत + ऋषभ = भरतर्षभ (गुण सन्धि) |
| **उक्त्वा** | = | कहकर, वच् + क्त्वा = उक्त्वा |
| **पृच्छ** | = | पूछिए |
| **वरम्** | = | श्रेष्ठ |
| **गुरुतरम्** | = | बड़ा |
| **भिषज्** | = | औषधि |
| **परदूषणम्** | = | दूसरों में दोष खोजने वाला |
| **जीवन्तु** | = | जीवित होंवे |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. 'सार्थम् प्रवसतो मित्राम्' इत्यत्र 'सार्थम्' इति पदस्य कोऽर्थः?

(क) विद्वान् (ख) धनवान्

(ग) सहयात्री (घ) भार्या ( )

२. कः शत्रुर्दुर्जयः पुंसाम्?

(क) अहङ्कारः (ख) दम्भः

(ग) क्रोधः (घ) व्याधिः ( )

३. गगनाद्-उच्चतर कः?

(क) माता (ख) पिता

(ग) मित्रम् (घ) वायुः ( )

४. 'पैशुन्य' किम् उच्यते?

(क) अहंकारः (ख) क्रोधः

(ग) परदूषणम् (घ) दम्भः ( )

## लघूत्तरात्मकप्रश्नाः –

१. प्रवसतां किं मित्रम् ?

२. असाधुः कीदृशः स्मृतः ?

३. आतुरस्य किं मित्रम् ?

४. तृणात् किंस्विद् बहुतरम् ?

५. दम्भः कः परिकीर्तितः ?

## निबन्धात्मकप्रश्नाः –

१. 'यक्ष-युधिष्ठिर' इति संवादं स्वभाषया संस्कृतेन लिखतु।

२. यक्षः जलं पीतमानं युधिष्ठिरं किम् अवदत् ?

## व्याकरणात्मक-प्रश्नाः –

**(क) अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धेर्नाम अपि लेख्यम् -**

| | पदम् | विच्छेदः | सन्धिनाम |
|---|---|---|---|
| १. | प्रोक्तम् | ...................... | ...................... |
| २. | इन्द्रियार्थान् | ...................... | ...................... |
| ३. | भरतर्षभ | ...................... | ...................... |
| ४. | देवतातिथिः | ...................... | ...................... |
| ५. | कश्च | ...................... | ...................... |

**(ख) निम्नलिखितपदानां समास विग्रहं कृत्वा समास नामोल्लेख करणीयः -**

| | पदम् | विग्रहः | नाम |
|---|---|---|---|
| १. | यथाप्रज्ञम् | ............................... | ............................... |
| २. | लोकपूजितः | ............................... | ............................... |
| ३. | परदूषणम् | ............................... | ............................... |
| ४. | महाज्ञानम् | ............................... | ............................... |

**( ग ) निम्नाङ्कितानां प्रकृति-प्रत्ययौ लेख्य –**

| | पदम् | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|---|
| १. | प्रवसतः | .................. | .................. | .................. |
| २. | अनुभवन् | .................. | .................. | .................. |
| ३. | प्रोक्तम् | .................. | .................. | .................. |
| ४. | कौन्तेय | .................. | .................. | .................. |

**( घ ) अधोलिखित पदानां मूलशब्दं विभक्तिश्च दर्शय –**

| | पदम् | मूलशब्दः | विभक्तिः |
|---|---|---|---|
| १. | आतुरस्य | ...................... | ...................... |
| २. | बुद्ध्या | ...................... | ...................... |
| ३. | मया | ...................... | ..................... |
| ४. | तस्मात् | ...................... | ...................... |

**( ङ) निम्नलिखितपदेषु मूलधातुं लकारञ्च चिनुत–**

| | पदम् | धातुः | लकारः |
|---|---|---|---|
| १. | हरस्व | ...................... | ...................... |
| २. | जीवतु | ...................... | ...................... |
| ३. | चिकीर्षामि | ...................... | ...................... |
| ४. | निर्वपति | ...................... | ...................... |

**( च ) निम्नलिखित वाक्यानाम् आधारेण प्रश्ननिर्माणं करोतु–**

१. पाण्डवाः पञ्च भ्रातरः आसन्।

........................................................................................................ ?

२. पाण्डवेषु युधिष्ठिरः ज्येष्ठः आसीत्।

........................................................................................................ ?

३. गृहे भार्या मित्रं भवति।

........................................................................................................ ?

४. 'महाभारतं' शतसाहस्री संहिता इत्यपि कथ्यते।

........................................................................................................ ?

❀ ❀ ❀

# नवम पाठः
# महाकविः माघः

मरुभूमिः राजस्थानं न केवलं वीराणां भक्तानाञ्च भूमिः अस्ति, अपितु विदुषां महाकवीनामपि भूमिः। संस्कृतसाहित्ये 'बृहत्त्रयी' इति नाम्ना प्रसिद्धानि, त्रीणि महाकाव्यानि सन्ति– भारविकवेः 'किरातार्जुनीयं' माघस्य 'शिशुपालवधं' श्रीहर्षस्य च 'नैषधीयचरितम्'।

एषु शिशुपालवधस्य रचयितामहाकवेः माघस्य जन्म राजस्थानस्य जालौर–जनपदान्तर्गते भीनमालनगरे श्रीमालीब्राह्मणपरिवारे अभवत्। भीनमालनगरस्य पुरातनं नाम 'भिन्नमाल' इति आसीत्। श्रीमालीब्राह्मणानां बाहुल्यात् अस्य क्षेत्रस्य अपरं नाम 'श्रीमालक्षेत्रम्' अपि आसीत्।

माघस्य पितामहः सुप्रभदेवः वर्मलातनामकस्य राज्ञः प्रधानमन्त्री आसीत्। माघस्य पिता दत्तकः विद्वान् दानशीलः चासीत्। दत्तकस्य गृहे विक्रमस्य सप्तम–शताब्द्यां माघस्य जन्म अभवत्। पितृवत् माघोऽपि विद्वान् दानशीलः च। भोजप्रबन्धनाम्नि ग्रन्थे माघस्य जीवनवृत्तं लिखितमस्ति। राजा भोजः माघस्य आश्रयदाता मित्रं चासीत्। एकदा दानशीलः माघ निर्धनः जातः। माघस्य पत्नी एकां कवितां स्वीकृत्य भोजसमीपे गच्छति। भोजः तस्यै प्रभूतं धनं ददाति। यदा सा गृहं प्रति आगच्छति तदा मार्गे याचकेभ्यः सर्वं धनं ददाति। रिक्तहस्ता सा गृहम् आगच्छति। तदानीम् अपि गृहस्य द्वारे बहवः याचकाः आसन्। याचकानां कृते माघस्य समीपे धनं न आसीत्, अतएव सः बहु–दुःखितः भूत्वा स्वप्राणान् एव अत्यजत्।

माघेन 'शिशुपालवधं' इति एकमेव महाकाव्यं लिखितम्। अस्य कथायाः आधारः महाभारतम् (सभा पर्वः) अस्ति। विंशतिः सर्गात्मकेऽस्मिन् महाकाव्ये १६५० श्लोकाः सन्ति। अस्य कथानकं महाभारतात् गृहीतमस्ति। वीररसः मुख्यरूपेण अस्ति। महाकाव्यस्यास्य नायकः श्रीकृष्णः। माघकाव्यस्य वर्णनशैली यद्यपि महाकविभारविमनुकरोति, तथापि प्रौढरचनाशैली प्राञ्जलाभिव्यक्तिः माधुर्यमयपदगुम्फनञ्च माघकाव्ये विशिष्टाञ्चमत्कृतिं प्रकटयति। विद्वद्भिः कालिदासस्य कृतिषु उपमानां प्राधान्यं, भारवेः काव्ये अर्थगौरवस्य वैशिष्ट्यं, दण्डिनश्च दशकुमारचरिते पदलालित्यं स्वीकृतम्, माघस्य कृतौ शिशुपालवधे तु त्रयाणामपि गुणानामेकत्र समावेशोऽस्ति।

वस्तुतः माघस्य काव्ये उपमा, अर्थगौरवं पदलालित्यञ्च त्रयो गुणाः सन्ति ।अत एव कथ्यते–

**''उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।**

अस्य सूक्तकथनस्याऽयं भावो यदसौ माघः काव्यकलायामतिनिपुणः प्रतिभाविलाससमन्वितश्च आसीत्। अस्य महाकाव्ये यथा भावपक्षः प्रशस्यः, तथैव कलापक्षोऽपि प्रशस्यातिप्रशस्यतमः। अलङ्काराणां

प्रयोगे, छन्दोरचनाकौशले, व्याकरणनैपुण्यप्रदर्शने, कोमलकान्तपदावल्याः संधाने, शास्त्रीयज्ञानप्रतिपादने च माघः सर्वानपि अन्यान् कवीन् अतिशेते। अयं नीतिशास्त्रनिपुणो दर्शनशास्त्रपारङ्गतः सङ्गीतस्वरसाधकश्च सिध्यति, यतो ह्यस्य महाकाव्ये चमत्कारजननमेव यदि मधुरं किमपि तत्त्वं भवति तत्रापि माघः प्राथम्यं भजते।

कालिदासस्य यथा मेघदूतं प्रसिद्धम् तथैव माघस्य काव्यमिदमपि प्रसिद्धमस्ति। द्वयोः काव्ययोः सौन्दर्यं दृष्ट्वा एव उक्तम् यद्– **'मेघे माघे गतं वयः।'** महाकविः माघेन शिशुपालवधमहाकाव्यस्य प्रथमनवसर्गेषु स्व अक्षय शब्दकोषस्य पूर्ण प्रदर्शनं कृतम्। तेन प्रयत्नपूर्वकं एकस्य भावस्य कृते अथवा भिन्न-भिन्नार्थस्य कृते नूतनशब्दानां प्रयोगः कृतः। अतएव कथ्यते– **'नवसर्गगते माघे नवशब्दो न विद्यते।'**

समीक्षकाणां दृष्टावपि माघ एव श्रेष्ठः अस्ति। तेषामनुसारेण भारवेः शोभाः माघस्योदयात् पूर्वम् इति यावदेव अस्ति। अत एव उच्यते– **'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः।'**

माघस्योपमावैशिष्टस्य उदाहरणं –

**उदयति वितोर्ध्वरश्मिरज्जा बहिमरुचौ हिमधाम्नि याति चास्तम्।**
**वहति गिरिरयं विलम्बि-घण्टा-द्वय-परिवारित-वारणेन्द्र-लीलाम्।।**

अयं दृष्ट्वा एव माघः 'घण्टामाघः' इति नाम्ना प्रसिद्धोऽभूत्। माघस्यार्थगौरवस्य सौन्दर्यमपि दृश्यते यथा– **'महीयांसः प्रकृत्या मितभाषिणः', 'सर्वः स्वार्थं समीहते', 'समय एव करोति बलाबलम्' 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'।**

पदलालित्यस्य वैशिष्ट्यमपि एकस्मिन् श्लोके दृश्यतेऽत्र–

**मधुरया मधुबोधितमाधवी, मधुसमृद्धिसमेधितः-मेधया।**
**मधुकराङ्गनया मुहुरुन्मद- ध्वनिभृता निभृताक्षरमुज्जगे।।**

संक्षेपतः स्पष्टमेव यन्माघः काव्यनिर्माणे यथा कलापक्षमुत्कृष्टतमं स्वीकरोति तथापि भावपक्षदृष्ट्या अस्य लेखनीं सुललितं माधुर्यपूर्णञ्चास्ति। संस्कृतसाहित्ये बृहत्त्र्यामस्य महाकाव्यस्य गणना क्रियते। सुरभारतिसमुपासकानां कृतेऽयं महाकविर्माघः परमसमादरणीयः।

## शब्दार्थाः

| | | |
|---|---|---|
| **मरुभूमिः** | = | मरुस्थलम् (रेगिस्तान) |
| **बृहत्त्रयी** | = | त्रयाणां विशालकाव्यानां समूहः |
| **पुरातनम्** | = | प्राचीनम् |
| **अपरम्** | = | द्वितीयम् (अन्य, दूसरा) |
| **राज्ञः** | = | नृपस्य (राजन् शब्द, षष्ठी, एकवचनम्) |
| **प्रभूतम्** | = | अत्यधिकम् |
| **याचकेभ्यः** | = | भिक्षुकेभ्यः (याचक शब्द, चतुर्थी, बहुवचनम्) |

| | | |
|---|---|---|
| **रिक्तहस्ता** | = | रिक्तं हस्तं यस्याः सा |
| **बहवः** | = | बहु शब्द, प्रथमा, बहुवचनम् |
| **अत्यजत्** | = | त्यज् धातु, लङ्लकार प्रथमपुरुषः, एकवचनम् |
| **तथैव** | = | तद्वत्, तथा + एव (वृद्धि सन्धिः) |

## अभ्यासः

### वस्तुनिष्ठप्रश्नाः –

१. भारविकवेः रचना अस्ति–

(क) किरातार्जुनीयम् (ख) शिशुपालवधम्

(ग) नैषधीयचरितम् (घ) मेघदूतम् ( )

२. माघस्य पितुः नाम आसीत्–

(क) सुप्रभदेवः (ख) दत्तकः

(ग) भोजः (घ) विक्रमः ( )

३. माघस्य जीवनवृत्तं लिखितम् अस्ति –

(क) शिशुपालवधे (ख) मेघदूते

(ग) भोजप्रबन्धे (घ) किरातार्जुनीये ( )

४. माघस्य आश्रयदाता आसीत् –

(क) वर्मलातः (ख) सुप्रभदेवः

(ग) विक्रमः (घ) भोजः ( )

५. शिशुपालवधे सर्गाः सन्ति–

(अ) विंशतिः (ब) त्रयः

(स) अष्टादश (द) षोडश ( )

### लघूत्तरात्मकप्रश्नाः –

१. राजस्थानं कीदृशानां जनानां भूमिः अस्ति?

२. माघस्य जन्म कुत्र अभवत्?

३. शिशुपालवधस्य नायकः कः अस्ति?

४. शिशुपालवधस्य कथायाः आधारः किम् अस्ति?

५. माघस्य काव्ये कति गुणाः सन्ति?

## निबन्धात्मकप्रश्नाः –

१. माघस्य जीवनवृत्तस्य वर्णनं कुरुत।

२ शिशुपालवधस्य काव्यवैशिष्ट्यं लिखत।

## व्याकरणात्मक प्रश्नाः –

**१. अधोलिखितपदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत-**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| अभवत् | भू | लङ् | प्रथमः | एकवचनम् |
| आसीत् | .................... | .................... | .................... | .................... |
| आसन् | .................... | .................... | .................... | .................... |
| अस्ति | .................... | .................... | .................... | .................... |
| सन्ति | .................... | .................... | .................... | .................... |
| गच्छति | .................... | .................... | .................... | .................... |
| ददाति | .................... | .................... | .................... | .................... |
| अत्यजत् | .................... | .................... | .................... | .................... |

२. अधोलिखितपदेषु शब्द-विभक्ति-वचनानां निर्देशं कुरुत-

| पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| माघस्य | माघ | षष्ठी | एकवचनम् |
| नगरस्य | .................... | .................... | .................... |
| दत्तकस्य | .................... | .................... | .................... |
| भक्तानां | .................... | .................... | .................... |
| वीराणां | .................... | .................... | .................... |
| कवेः | .................... | .................... | .................... |
| विदुषां | .................... | .................... | .................... |
| गृहे | .................... | .................... | .................... |
| याचकेभ्यः | .................... | .................... | .................... |

**३. अधोलिखितपदेषु प्रत्ययस्य निर्देशनं कुरुत-**

लिखितम्- लिख् + क्त

जातः - ....................... + ......................

| | | | | |
|---|---|---|---|---|
| स्वीकृत्य | – | ........................ | + | ........................ |
| भूत्वा | – | ....................... | + | ....................... |
| दृष्ट्वा | – | ........................ | + | ........................ |

४. **अधोलिखितपदेषु समासविग्रहं कृत्वा समासस्य नामनिर्देशनं कुरुत–**

| | | | |
|---|---|---|---|
| आश्रयदाता | – | आश्रयस्य दाता | (षष्ठी तत्पुरुष:) |
| भोजसमीपे | – | ................................ | ........................ |
| अर्थगौरवं | – | ................................ | ........................ |
| पदलालित्यं | – | ................................ | ........................ |
| जीवनवृत्तं | – | ................................. | ........................ |

५. **अधोलिखितपदेषु काल ( लकार ) परिवर्तनं कुरुत–**

| | | | |
|---|---|---|---|
| अभवत् | – | (लट्) | भवति |
| आसीत् | – | (लट्) | ........................ |
| गच्छति | – | (लङ्) | ........................ |
| अत्यजत् | – | (लट्) | ........................ |
| ददाति | – | (लृट्) | ........................ |
| आगच्छति | – | (लृट्) | ....................... |
| सन्ति | – | (लङ्) | ........................ |

६. **अधोलिखितपदेषु वचनपरिवर्तनं कुरुत–**

| | | | |
|---|---|---|---|
| कवे: | – | (बहुवचनम्) | कवीनाम् |
| भक्तानां | – | (एकवचनम्) | .................... |
| वीराणां | – | (एकवचनम्) | .................... |
| विदुषां | – | (एकवचनम्) | .................... |
| राज्ञ: | – | (बहुवचनम्) | .................... |
| याचकेभ्य: | – | (एकवचनम्) | .................. |

७. **अधोलिखितशब्दानाम् आधारेण वाक्यनिर्माणं कुरुत–**

| | | |
|---|---|---|
| एकदा | – | माघ: एकदा निर्धन: जात:। |
| प्रभूतं | – | ..................................................................................। |
| विंशति: | – | ..................................................................................। |

त्रयः – ............................................................................।

यदा-तदा- ............................................................................।

तथैव – ............................................................................।

कति – ............................................................................।

अपरं – ............................................................................।

८. **अधोलिखितानाम् उत्तराणामाधारेण प्रश्ननिर्माणं कुरुत –**

उदा. – माघस्य जन्म भीनमालनगरे अभवत।

प्रश्नः– माघस्य जन्म कुत्र अभवत् ?

१. भीनमालनगरस्य पुरातनं नाम भिन्नमाल इति आसीत्।

**प्रश्नः**– ..............................................................................................?

२. माघः विद्वान् दानशीलः च आसीत् ।

**प्रश्नः**– ..............................................................................................?

३. शिशुपालवधे मुख्यरूपेण वीररसः अस्ति।

**प्रश्नः**–..............................................................................................?

४. कालिदासस्य मेघदूतं प्रसिद्धम् अस्ति।

**प्रश्नः**– ..............................................................................................?

५. माघस्य पितामहः सुप्रभदेवः आसीत्।

**प्रश्नः**– ..............................................................................................?

❀ ❀ ❀

# दशमः पाठः
# कारुण्यं रामभद्रस्य

महाकविः भवभूतिः संस्कृतवाङ्मयस्य मूर्धन्यः कविः अस्ति। प्रायः वीरशृङ्गाररसप्रधाने काव्यजगति एकेन भवभूतिना एव करुणं रसं आधृत्य नाटकं रचितम्। भवभूतिः विविधानां पात्राणाम् मनोवैज्ञानिकचित्रणस्य भावोन्मेषस्य, भावानां अन्तर्द्वन्द्वस्य च अप्रतिमः रचयिता अस्ति। यत्र सर्वे कवयः प्रकृत्या सुन्दरं रूपं एव चित्रितवन्तः तत्रैव भवभूतिना प्रकृत्याः भयावहस्वरूपस्यापि स्वाभाविकं, हृदयग्राही च चित्रणं कृतम्। कवेः तिस्रः कृतयः सन्ति मालतीमाधवम्, महावीरचरितम्, उत्तररामचरितम् इति। उत्तररामचरितम् कवेः अन्तिमा रचना अस्ति। अस्मिन् करुणो रसः अङ्गीरसः अस्ति। अस्मिन् श्रीरामचन्द्रस्य राज्याभिषेकोपरान्तस्य कथानकः वर्णितः। सीतायाः अपवादः पुनः वनवासः, लवकुशयोः जन्म, शम्बूकस्य वधः, अन्ततः वाल्मीकिआश्रमे समग्रपरिवारजनानां सम्मेलनम् अत्र वर्णितः। अस्य नाटकस्य तिस्रः विशिष्टताः सन्ति प्रथमा- चित्रवीथिदर्शनम् (प्रथमाङ्के), द्वितीया- छायाङ्कं, (तृतीयाङ्के), तृतीया- गर्भाङ्कः (सप्तमाङ्के)।

राज्ञः रामचन्द्रस्य लोकरञ्जकः स्वरूपः, रामराज्यस्य चावधाराणा उत्तररामचरितस्य सारभूतः तत्त्वः अस्ति। भवभूतिना महावीरचरिते, मालतीमाधवे च स्वपरिचयं सङ्केतितः। अस्य पूर्वजाः तैत्तिरीयशाखाध्यायिनः काश्यपगोत्रीयाः ब्राह्मणाः आसन्। जननी जतुकरणी, पिता च नीलकण्ठः आसीत्। भवभूतिः न्याय-मीमांसा-व्याकरणशास्त्राणां मूर्धन्यः विद्वान् आसीत्।

प्रस्तुतः पाठः उत्तरामचरितस्य 'छायाङ्क' इति नाम्ना तृतीयाङ्कात् उद्धृतः। सीतात्यागोपरान्तः रामः शम्बूकवधहेतुना दण्डकारण्ये गच्छति, यत्र स्वप्रियाम् सीताम् स्मृत्वा मर्मभेदी विलापं करोति। सीताऽपि स्वपुत्रयोः कुशलवयोः वर्षग्रन्थौ वाल्मीकि-आश्रमे गच्छति। दण्डकारण्ये रामञ्च पश्यति। गङ्गायाः प्रसादेन अदृश्या सीता रामं स्वशीतलस्पर्शेन पुनः पुनः नवजीवनं ददाति। श्रीरामस्य भावान्, करुण विलापं च श्रुत्वा सा स्वाकारण परित्यागस्य दुःखमपि विस्मृत्य मुक्ता भवति। लोकरञ्जनाय त्यागोपरान्तः रामविषयकः विलापः रामस्य पत्नीव्रतं, सीतां प्रति प्रेमञ्च अभिव्यञ्जति। अत्र भवभूतेः करुणरसः पुनः पुनः दीप्तः।

(ततः प्रविशति नदीद्वयम्)

एका – सखि मुरले, किमसि सम्भ्रान्तेव ?

मुरला – सखि तमसे, प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम्। जानास्येव यथा वधूपरित्यागात् प्रभृति-

**अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।**
**पुटपाकप्रतीकाशो रामस्य करुणो रसः।। १।।**

मुरला - तेन च तथाविधेष्टजन-कष्टविनिपातजन्मना प्रकृष्टतां गतेन दीर्घशोकसंतापेन संप्रत्यतितरां परिक्षीणो रामभद्रः। तमवलोक्य कंपितमिव कुसुमसमबन्धनं मे हृदयम्। अधुना च प्रतिनिवर्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशाः द्रष्टव्याः। तत्र निसर्गधीरस्याप्येवं विधायामवस्थाया-मतिगम्भीराभोगशोकक्षो भसंवेगात् पदे पदे महाप्रमादानि शोकस्थानानि शङ्कनीयानि रामभद्रस्य। तद् भगवति गोदावरी त्वया तत्र-भवत्या सावधानया भवितव्यम्।

**वीचिवातैः शीकरक्षोदशीतै, राकर्षद्भिः पद्मकिंजल्कगन्धान्।**
**मोहे मोहे रामभद्रस्य जीवं, स्वैरं स्वैरं प्रेरितैस्तर्पयेति ।। २।।**

तमसा - उचितमेव दाक्षिण्यं स्नेहस्य। सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्याद्य संनिहितः।

मुरला - कथमिव ?

तमसा - तत्सर्वं श्रूयताम्-पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य निवृत्ते सति लक्ष्मणे सीता देवी प्राप्तप्रसववेदनमतिदु:ख संवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती।

तदैव तत्र द्वारकद्वयं च प्रसूता। भगवतीभ्यां भगीरथी-पृथिवीभ्यामस्युपपन्ना रसातलं च नीता। स्तन्यत्यागात् परेण दारकद्वयं च तस्य प्राचेतस्य महर्षे गङ्गादेव्या समर्पितं स्वयम्।

मुरला - (सविस्मयम्)

**ईदृशानां विपाकोऽपि जायते परमाद्भुतः।**
**यत्रोपकरणीभाव-मायात्येवं विधो जनः।। ३।।**

मुरला - अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि।

तमसा - तदियं गोदावरी हृदान्निर्गत्य-

**परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्।**
**करुणस्य मूर्तिरथवा शरीरिणी, विरहव्यथेव वनमेति जानकी।। ४।।**

मुरला - इयं हि सा-

**किसलयमिव मुग्धं बन्धनाद् विप्रलूनं**
**हृदयकमलशोषी दारुणो दीर्घशोकः।**

**ग्लपयति परिपाण्डु क्षाममस्याः शरीरं**
**शरदिज इव घर्मः केतकीगर्भपत्रम्।।५।।**

(इति परिक्रम्य निष्क्रान्ते)

**(नेपथ्ये)**

जात ! जात !

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता)

सीता – अहो, जानामि प्रियसखी वासन्ती व्याहारतीति।

(पुनर्नेपथ्ये)

**सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै,**
**रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत्।**

सीता – किं तस्य?

(पुनर्नेपथ्ये)

**वध्वा सार्धं पयसि विहरन् सोऽयमन्येन दर्पा-**
**दुद्दामेन द्विरदपतिना संनिपत्याभियुक्तः।।६।।**

सीता – (ससम्भ्रमं कतिचित् पदानि गत्वा) परित्रायस्व परित्रायस्व। मम तं पुत्रकम्। (विचिन्त्य) हा धिक् आर्यपुत्र! हा धिक् ! तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति। हा आर्यपुत्र! (इति मूर्च्छति)

(प्रविश्य)

समाश्वसिहि। समाश्वसिहि।

(नेपथ्ये) विमानराज अत्रैव स्थीयताम्।

सीता – अहो जलभर-भरितमेघमन्थरस्तनित गम्भीरमांसलः कुतोन्वेष भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकयति।

तमसा – (सस्मितास्रम्) अयि वत्से!

**अपरिस्फुटनिक्वाणे कुतस्त्येऽपि त्वमीदृशी।**
**स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता।।७।।**

सीता – भगवति! किं भणसि अपरिस्फुटेति? स्वरसंयोगेन प्रत्यभिजानामि नन्वार्यपुत्रेणैवैतद् व्याहृतम्।

तमसा – वत्से समाश्वसिहि, समाश्वसिहि।

(नेपथ्ये)

अनेन पञ्चवटीदर्शनेन–

**अन्तर्लीनस्य दु:खाग्नेरद्योद्दामं ज्वलिष्यत:।**
**उत्पीडइव धूमस्य मोह: प्रागावृणोति माम्।। ८।।**

हा देवि दण्डकारण्यप्रियसखि विदेहराजपुत्रि! (इति मूर्च्छति)

सीता – हा धिक्, हा धिक्, मां मन्दभागिनीं व्याहृत्यामीलित नेत्र–नीलोत्पलो मूर्च्छित एव। हा कथं धरणीपृष्ठे निरूद्ध–नि:श्वासनि:सहं विपर्यस्त:? भगवति तमसे परित्रायस्व, परित्रायस्व, जीवयार्यपुत्रम्। (इति पादयो: पतति)

तमसा –

**त्वमेव ननु कल्याणि! संजीवय जगत्पतिम्।**
**प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जन:।। ९ ।।**

सीता – यद्भवतु तद् भवतु। यथा भगवत्याज्ञापयति।

(तत: प्रविशति भूम्यां निपतित: सास्त्रया सीतया स्पृश्यमान: सोह्लादोच्छ्वासो राम:)

सीता – जाने पुन: प्रत्यागतमिव जीवितं त्रैलोक्यस्य।

राम: – हन्त भो:, कमेतत्?

**स्पर्श: पुरा परिचितो नियतं स एव,**
**सञ्जीवनश्च मनस: परितोषणश्च।**
**सन्तापजां सपदि य: परिहृत्य मूर्च्छा–**
**मानन्दनेन जड़तां पुनरातनोति।। १०।।**

सीता – (ससाध्वसकरुणमुपसृत्य) एतावदेदानीं मम् बहुतरम्।

राम: – (उपविश्य) न खलु वत्सलया देव्याऽभ्युपपन्नोऽस्मि?

सीता – हा धिक्, हा धिक् किमित्यार्यपुत्रो मां मार्गिष्यते?

राम: – भवतु, पश्यामि।

सीता – भगवति तमसे अपसराव तावत् मां प्रेक्ष्यानभ्युनुज्ञातेन संनिधानेन राजाधिकं कोपिष्यति।

तमसा – अयि वत्से, भगीरथीप्रसादाद् वनदेवतानामप्यदृश्यासि संवृत्ता।

सीता – अस्ति खल्वेतत्?

राम: – हा प्रिये जानकि!

सीता – आर्यपुत्र, असदृशं खल्वेततस्य वृत्तान्तस्य। (सास्रम्) भगवति किमिति व्रजमयी जन्मान्तरेष्वपि पुनरप्यसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्यैवंवादिन–आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि?

अहमेवैतस्य हृदयं जानामि, ममैषः।

रामः – (सर्वतोवलोक्य) (सनिर्वेदम्) हा न किञ्चिदत्र। देवि –

**प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः**
**अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि।। ११।।**

सीता – एते खलु तेऽगाधमानसंदर्शितस्नेहसंभारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः। जाने प्रत्यनेन निष्कारणपरित्याग-शल्यितोऽपि बहुमतो मे जन्मलाभः।

रामः – (सर्वतोऽवलोक्य) हा, कथं नास्त्येव? नन्वकरुणे वैदेहि!

सीता – अकरुणास्मि यैवंविधं त्वां पश्यन्त्येव जीवामि।

रामः – क्वासि प्रिये! देवि! प्रसीद प्रसीद। न मामेवं विधं त्यक्तुमर्हसि। कष्टं भोः

**व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,**
**प्रज्ञा जाम्बवन्तो न यत्र, न गतिः पुत्रस्य वायोरपि।**
**मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः**
**सौमित्रेरपि पत्रिणामविषये तत्र प्रिये! क्वासि मे।।१२।।**

सीता – बहुमानितास्मि पूर्वविरहे।

रामः – दुःखायैव सुहृदामिदानीम् रामदर्शनम्। तदनुजानीहि मां गमनाय।

सीता – (तमसामाश्लिष्य) हा भगवति तमसे, गच्छतीदानीमार्यपुत्रः। किं करोमि ? (इति मूर्च्छति)

तमसा – वत्से जानकि! समाश्वसिहि। विधिस्तवानुकूलो भविष्यति। तदायुष्मतोः कुशलवयोर्वर्षर्द्धिमङ्गलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छावः।

रामः – अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे।

सीता – (साक्षेपम्) आर्यपुत्रः कः ?

वासन्ती – परिणीतमपि किम् ?

रामः – नहि, नहि, हिरण्यमयी सीताप्रतिकृतिः।

सीता – (सोच्छ्वासास्रम्) आर्यपुत्र, इदानीमसि त्वम्। अहो उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण।

वासन्ती – महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम्।

रामः – तथास्तु।

(सर्वे निष्कान्ताः)

**पद्यानाम् अन्वयः-**

१. गभीरत्वात् अनिर्भिन्नः अन्तर्गूढघनव्यथः रामस्य करुणः रसः पुटपाकप्रतीकाशः।

२. शीकरक्षोदशीतैः पद्मकिंजल्कगंधान् आकर्षद्भिः स्वैरं स्वैरं प्रेरितैः वीचिवातैः रामभद्रस्य मोहे मोहे जीवम् तर्पय इति।

३. ईदृशानां विपाकः अपि परमाद्भुतः जायते। यत्र एवंविधः जनः उपकरणीभावम् आयाति।

४. परिपाण्डुदुर्बलकपोलसुन्दरम् विलोलकबरीकम् आननम् दधती, जानकी करुणस्य मूर्तिः अथवा शरीरिणी विरहव्यथा इव वनम् एति।

५. हृदयकमलशोषी दारुणः दीर्घशोकः बन्धनात् विप्रलूनम् मुग्धम् किसलयमिव परिपाण्डु क्षामम् अस्याः शरीरं, शरदिजः घर्मः केतकीगर्भपत्रम् इव ग्लपयति।

६. पुरा अग्रे लोलः यः करिकलभकः सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रैः वर्धितः अभूत्। स अयम् वध्वा सार्धम् पयसि विहरन् अन्येन उद्दामेन द्विरदपतिना दर्पात् संनिपत्य अभियुक्तः।

७. स्तनयित्नोः अपरिस्फुटनिक्वाणे मयूरी इव त्वम् कुत्स्त्ये अपि ईदृशी चकितोत्कण्ठितं स्थिता।

८. अन्तर्लीनस्य अद्य उद्दामं ज्वलिष्यतः दुःखाग्नेः धूमस्य उत्पीडः इव मोहः माम् प्राक् आवृणोति।

९. कल्याणि! त्वम् एव ननु जगत्पतिम् संजीवय, हि ते पाणिः प्रियस्पर्शः तत्र एष जनः निरतः।

१०. पुरा परिचितः संजीवनः च मनसः परितोषणः च नियतम् स एव स्पर्शः यः सन्तापजां मूर्च्छाम् परिहृत्य सपदि आनन्दनेन पुनः जड़ताम् आतनोति।

११. स्नेहार्द्रशीतलः ते स्पर्शः मूर्तः प्रसादः इव अद्यापि माम् आनन्दयति, नन्दिनि ! त्वम् पुनः क्व असि?

१२. यत्र मे कपीन्द्रसख्यम् अपि व्यर्थम्, हरीणाम् वीर्यम् वृथा, यत्र जाम्बवन्तः प्रज्ञा न, वायोः पुत्रस्य अपि यत्र गतिः न, यत्र विश्वकर्मतनयः नलः अपि मार्गम् कर्तुम् न क्षमः, सौमित्रेः अपि पत्रिणाम् अविषये तत्र क्व मे प्रिये असि ?

## कठिनः शब्दार्थाः

| | | |
|---|---|---|
| **अनिर्भिन्नो** | – | अविदीर्णः, अव्यक्तः। |
| **गभीरत्वाद्** | – | स्वभावगाम्भीर्यात्, सघनवस्त्रमृत्तिकालेपसंयुक्तत्वात्। |
| **अन्तर्गूढ** | – | अन्तःकरणे गुप्तः। |
| **घनव्यथ** | – | प्रगाढ़ा व्यथा यस्य सः। |
| **पुटपाकप्रतीकाशः** | – | पुटे पात्रे पचनं तेन सदृशः। |
| **प्रकृष्टतां** | – | पराकाष्ठाम् प्राप्ताम्। |
| **परिक्षीणो** | – | अतीव कृशः। |
| **कुसुमसमबन्धनं** | – | कुसुमं इव कोमलं बन्धनम्। |
| **अतिगम्भीराभोग** | – | अति गम्भीरः यः आभोगः विस्तारः (गहरे विस्तार वाले)। |

| | | |
|---|---|---|
| **वीचिवातैः** | – | तरङ्गवायुभिः (लहरों की वायु से)। |
| **शीकरक्षोदशीतैः** | – | जलकणानां क्षोदाः चूर्णाः तैः शीतलाः (जलकणों के बिन्दुओं से शीतल)। |
| **पद्मकिंजल्कगन्धान्** | – | कमलानां केसराः तेषां गन्धान् (कमल-पराग से सुगन्धित)। |
| **स्वैरं-स्वैरं** | – | मन्दं मन्दं (धीरे-धीरे)। |
| **दाक्षिण्यं** | – | औदार्यम् (उदारता)। |
| **सन्निहितः** | – | निकटस्थः (समीप)। |
| **निक्षिप्तवती** | – | समर्पितवती (सीता ने स्वयं को फेंक दिया)। |
| **प्राचेतस्य** | – | वाल्मीकेः (वाल्मीकि के)। |
| **विपाको** | – | विषमः परिणामः। |
| **उपकरणीभावम्** | – | सहायत्वम् प्राप्नोति (सहायता को प्राप्त होती है)। |
| **तर्कयामि** | – | चिन्तयामि (सोचती हूँ)। |
| **परिपाण्डु** | – | अतिशयं पीतवर्णम् (अत्यन्त पीले)। |
| **विलोलकबरीकमाननम्** | – | चञ्चलः केशपाशः यस्मिन् तत् आननम् (चञ्चल, बिखरे बालों वाले मुख को)। |
| **विप्रलूनम्** | – | विच्छिन्नम् (टूटे हुए)। |
| **दारुणो** | – | भयङ्करः, कठोरः। |
| **ग्लपयति** | – | म्लानं करोति (मुर्झा देता है)। |
| **क्षामम्** | – | कृशम्। |
| **घर्मः** | – | आतपः (धूप)। |
| **स्वकरकलितैः** | – | स्वहस्तेन दत्तैः (अपने हाथ से दी गई)। |
| **करिकलभकः** | – | हस्तिशावकः (हाथी का बच्चा)। |
| **सन्निपत्याभियुक्तः** | – | वेगात् समीपम् आगत्य आक्रान्तः (तेजी से पास आकर दबा लिया)। |
| **परित्रायस्व** | – | रक्ष (रक्षा करो)। |
| **समाश्वसिहि** | – | धैर्यं धारयतु (धैर्य धारण करो)। |
| **स्तनितः** | – | गम्भीरः गर्जनः। |
| **निर्घोषो** | – | स्वरः। |
| **अपरिस्फुटनिक्वाणे** | – | अस्पष्टः ध्वनिः तस्मिन्। |
| **प्रागावृणोति** | – | पूर्वं आच्छादयति। |
| **उत्पीडः** | – | राशिः। |
| **विदेहराजपुत्रि** | – | सीता (सम्बोधन)। |
| **नेत्रनीलोत्पलो** | – | नेत्रे एव नीलकमले येन सः। |

| | | |
|---|---|---|
| **धरणीपृष्ठे** | – | पृथिवीतले, भूमौ। |
| **सास्त्रया** | – | अश्रु सहितया। |
| **सोल्हादोच्छ्वासो** | – | आह्लादेन, उच्छ्वासेन च युक्तः। |
| **सन्तापजां** | – | सन्तापेन जनितां, विरहदु:खोत्पन्नाम्। |
| **सपदि** | – | शीघ्रमेव। |
| **परिहृत्य** | – | दूरीकृत्य। |
| **पुनरातनोति** | – | पुन: प्रसारयति। |
| **उपसृत्य** | – | निकटं गत्वा। |
| **मार्गिष्यते** | – | अन्विष्यते (खोजेंगे)। |
| **प्रेक्ष्यानभ्युनुज्ञातेन** | – | प्रेक्ष्य (देखकर) आज्ञया विना (आज्ञा के बिना)। |
| **निरनुक्रोशा** | – | निर्दया। |
| **स्नेहार्द्रशीतलः** | – | स्नेहेन (प्रेम्णा) आर्द्रः स चासौ शीतलः शान्तिप्रदः (प्रेम से आर्द्र और शीतल)। |
| **नन्दिनि** | – | आनन्ददायि सीते (सम्बोधन)। |
| **आनन्दनिष्यन्दिनः** | – | रसवर्षिणः। |
| **उल्लापाः** | – | विलापाः। |
| **कपीन्द्रसख्यम्** | – | वानराणाम् इन्द्रः कपीन्द्रः सुग्रीवः तेन मित्रता (सुग्रीव की मित्रता)। |
| **हरीणां** | – | वानराणां। |
| **सौमित्रेरपि** | – | सुमित्रायाः पुत्रः लक्ष्मणः तस्य अपि (लक्ष्मण के भी)। |
| **पत्रिणाम्** | – | बाणानाम्। |
| **अनुजानीहि** | – | आज्ञापयतु। |
| **आश्लिष्य** | – | आलिंग्य। |
| **हिरण्यमयी** | – | स्वर्णमयी (स्वर्ण से निर्मित)। |
| **उत्खातितम्** | – | दूरीकृतम् (काँटा निकाल दिया है)। |
| **शल्यम्** | – | कण्टकम्। |
| **व्यतिकरो** | – | समागमः। |
| **प्रसादः** | – | अनुग्रहः। |

## अभ्यासः

### वस्तुनिष्ठ-प्रश्नाः–

१. तमसा, मुरला च का स्तः ?

(क) लताद्वयम् (ख) पात्रद्वयम्

(ग) नदीद्वयम् (घ) सखिद्वयम् ( )

२. परित्यागोपरान्तः सीता आत्मानं कुत्र निक्षिप्तवती ?

(क) गोदावरीप्रवाहे (ख) गंगाप्रवाहे

(ग) रसातले (घ) वाल्मीकि-आश्रमे ( )

३. छायारूपिणी सीता रामं कुत्र अमिलत् ?

(क) दण्डकारण्ये (ख) जनस्थाने

(ग) पञ्चवटीवने (घ) आश्रमे ( )

४. सीता कस्य प्रसादात् अदृश्याऽभवत् ?

(क) लोपामुद्राप्रसादात् (ख) तमसाप्रसादात्

(ग) वनदेवताप्रसादात् (घ) भगीरथीप्रसादात् ( )

### अतिलघूत्तरात्मक-प्रश्नाः

प्र.१. विदेहराजपुत्री का आसीत् ?

प्र.२. सीतायाः पुत्रयोः किम् अभिधानम् ?

प्र.३. रामस्य अश्वमेध-सहधर्मचारिणी का आसीत् ?

प्र.४. स्तन्यत्यागोपरान्तं सीतायाः दारकद्वयं कुत्र नीतम् ?

प्र.५. 'कपीन्द्र' शब्दः कस्य कृते प्रयुक्तः ?

### लघूत्तरात्मक-प्रश्नाः–

प्र.१. गोदावरीह्रदात् आगच्छती सीता कीदृशी आासीत् ?

प्र.२. रामाय सीतायाः स्पर्शः कीदृशः आसीत् ?

प्र.३. तमसा सीतां कुत्र अनयत् ?

प्र.४. रामचन्द्रेण कृतानि सीतायाः सम्बोधननामानि लिखत ।

### निबन्धात्मक-प्रश्नाः–

प्र.१. रामानुसारेण सीताायाः प्राप्ति विषये के के व्यर्थाः अभवन् ?

प्र. २. अस्मिन् पाठे करुणरसस्य विश्लेषणं कुरुत ।

प्र. ३. 'छायाङ्क' इति नामस्य सार्थकतां प्रतिपादयतु।

## व्याकरणात्मक-प्रश्नाः–

**१. अधो-लिखितेषु पदेषु नामोल्लेखपुरस्सरसन्धिः कार्यः -**

| | | | सन्धिः | सन्धिनाम |
|---|---|---|---|---|
| (क) | एव + इति | = | ............................ | .......................... |
| (ख) | सन्निपत्य + अभियुक्तः | = | ............................ | .......................... |
| (ग) | कुतो +नु + एष | = | ............................ | .......................... |
| (घ) | निः + अनुक्रोशा | = | ............................ | .......................... |
| (ङ) | आर्यपुत्रस्य + उल्लापाः | = | ............................ | .......................... |

**२. अधो-निर्दिष्टानां सन्धिपदानां सन्धि-नाम-निर्देशपूर्वक-विग्रहो विधेयः -**

| | सन्धिपदम् | | विग्रहः | सन्धिनाम |
|---|---|---|---|---|
| (क) | सम्भ्रान्तेव | = | ............................ | .......................... |
| (ख) | खल्वेतत् | = | ............................ | .......................... |
| (ग) | तत्रैष | = | ............................ | .......................... |
| (घ) | वर्धितोऽभूत् | = | ............................ | .......................... |
| (ङ) | प्रागावृणोति | = | ............................ | .......................... |

**३. निम्नलिखितानां समस्तपदानां नाम-निर्देश-पुरस्सर-विग्रहो विधेयः -**

| | समस्तपदम् | | विग्रहः | समासनाम |
|---|---|---|---|---|
| (क) | घनव्यथः | = | ..................................... | ............................ |
| (ख) | विश्वकर्मतनयः | = | ..................................... | ............................ |
| (ग) | जगत्पतिम् | = | ..................................... | ............................ |
| (घ) | दीर्घशोकः | = | ..................................... | ............................ |
| (ङ) | कपीन्द्रसख्यम् | = | ..................................... | ............................ |

**४. अधोनिर्दिष्टेषु पदेषु शब्द-विभक्ति-वचन-निर्देशं कुरुत -**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | रामभद्रेण | ................... | ...................... | ..................... |
| (ख) | भगवतीभ्याम् | ................... | ...................... | ..................... |
| (ग) | त्रैलोक्यस्य | ................... | ...................... | ..................... |

| | | | | |
|---|---|---|---|---|
| (घ) | मनसः | ..................... | ..................... | ..................... |
| (घ) | वध्वा | ..................... | ..................... | ..................... |
| (ङ) | माम् | ..................... | ..................... | ..................... |

५. **निम्नलिखितानां तिङन्तपदानां धातुः लकारः पुरुषः वचनं च पृथक् निर्दिश्यताम् –**

| | तिङन्तपदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | करोमि | ................. | ............... | .............. | .................. |
| (ख) | अस्ति | ................. | ............... | .............. | .................. |
| (ग) | आज्ञापयति | ................. | ............... | .............. | .................. |
| (घ) | ग्लपयति | ................. | ............... | .............. | .................. |
| (ङ) | भविष्यामि | ................. | ............... | .............. | .................. |
| (च) | गच्छावः | ................. | ............... | .............. | .................. |

६. **निम्नलिखितेषु पदेषु प्रकृतिः प्रत्ययश्च पृथक्-पृथक् लिख्यताम् –**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | भवितव्यम् | ........................ | ........................ |
| (ख) | स्पृश्यमानः | ........................ | ........................ |
| (ग) | नीता | ........................ | ........................ |
| (घ) | सम्पादयितुम् | ........................ | ........................ |
| (ङ) | परिहृत्य | ........................ | ........................ |
| (च) | निक्षिप्तवती | ........................ | ........................ |

## उत्तरमाला

वस्तुनिष्ठात्मक-प्रश्नाः १. (ख) २. (घ) ३. (ग) ४. (क)

❀ ❀ ❀

# एकादशः पाठः
# नीत्या स्वकार्यं साधनीयम्

पञ्चतन्त्रं नीतिकथासाहित्यस्य प्रथमं काव्यमस्ति। अस्य रचनाकारः विष्णुशर्मा आसीत्। पञ्चतन्त्रे पूर्वं द्वादशभागाः निबद्धा आसन् किन्तु साम्प्रतं पञ्चभागाः एव उपलभ्यन्ते– मित्रभेदः, मित्रलाभः, सन्धिविग्रहः, लब्धप्रणाशः, अपरीक्षितकारश्चेति। सम्पूर्णे पञ्चतन्त्रे गद्यभागेन सह ११३ श्लोकाः ७५ उपकथाश्च समुल्लसन्ति। पञ्चतन्त्रस्य प्रथमोऽनुवादः पहलवी–भाषायां ख्रिस्तस्य षष्ठशताब्द्याम् अभवत्। पञ्चतन्त्रस्य रचनाकालः ईसवीयस्य तृतीयशताब्दी आसीत् इतिविदुषां विवेचनानुसारेणप्रतीयते।

महिलारोप्यराजा अमरशक्तेः त्रयः पुत्राः परं ते च मूर्खाः आसन्। एकदा स विष्णुशर्मणो शिक्षणविषये माहात्म्यं श्रुतवान् अतएव सत्कृत्य तमानीतवान्। अमरशक्तिः पुत्रत्रयं शिक्षयितुं निवेदितवान्। विद्वान् पं. विष्णुशर्मा अपि तान्पाठयितुं प्रतिज्ञातवान्। कथात्मकशिक्षणेन ते त्रयोऽपिराजपुत्राः स्वल्पकालेन एव विद्वांसः नीतिनिपुणश्चाभवन्।

सङ्कलितकथा पञ्चतन्त्रस्य चतुर्थ तन्त्रः लब्धप्रणाशतः गृहीता यस्यां प्रधानशिक्षा मिलति यद् बुद्धिमान् मनुष्यः स्वकार्यं नीत्या साधयति। अस्मिन् संसारे अनेकैः मनुष्यैः सह सम्पर्कः भवति, ते च भिन्न–भिन्नविचारवन्तः सन्ति। अधिकबलशालिनः अपि सन्ति, निर्बलाः अपि सन्ति। तैः सह पृथक्–पृथक् व्यवहारेण स्वकार्यं साधनीयम्। मूर्खास्तु केवलं अहङ्कारेण स्वकार्यहानिम् एव कुर्वन्ति। उत्तमपुरुषं नम्रतया प्रणम्य स्वकार्यं साधनीयम्, शूरः भेदनीत्या स्वानुकूलः कार्यः, यः निकृष्टः अस्ति किन्तु बलशाली वर्तते तस्य कृते स्वल्पप्रदानम् उचितम्, यश्च समपराक्रमः किं वा दुर्बलः सः पराक्रमेण जेतव्यः। एतदेव राजनीतेः मूलमन्त्रम् ।

आसीत् कस्मिश्चित् वनप्रदेशे महाचतुरको नाम शृगालः, तेन कदाचित् अरण्ये स्वयं मृतो गजः समासादितः। सः तस्य समन्तात् परिभ्रमति, परं कठिनां त्वचं भेत्तुं न शक्नोति। अथ अत्र अवसरे इतश्चेतश्च विचरन् कश्चित् सिंहस्तत्रैव प्रदेशे समाययौ। अथ सिंहः समागतं दृष्ट्वा, स क्षितितलविन्यस्तमौलिमण्डलः, संयोजितकरयुगलः, सविनयमुवाच– 'स्वामिन्! त्वदीयोऽहं लागुडिकः स्थितस्त्वदर्थं गजमिमं रक्षामि। तदेनं भक्षयतु स्वामी' ।

तं प्रणतं दृष्ट्वा सिंहः प्राह – भो! नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि। उक्तञ्च –

**'वनेऽपि सिंहा मृगमांसभक्ष्याः, बुभुक्षिता नैव तृणं चरन्ति।**
**एवं कुलीना व्यसनाभिभूताः, न नीतिमार्गं परिलङ्घयन्ति'।।**

तत्तवैव गजोऽयं मया प्रसादीकृत:। तत् श्रुत्वा शृगाल: सानन्दमाह– युक्तमिदं स्वामिनो निजभृत्येषु। अथ सिंहे गते, कश्चित् व्याघ्र: समाययौ, तमपि दृष्ट्वा असौ व्यचिन्तयत्– अहो! एकस्तावद् दुरात्मा प्रणिपातेन अपवाहित:। तत्कथमिदानीमेनमपवाहयिष्यामि ? नूनं शूरोऽयं । न खलु भेदं विना साध्यो भविष्यति। उक्तञ्च यत: –

**'न यत्र शक्यते कर्तुं साम दानमथापि वा ।**
**भेदस्तत्र प्रयोक्तव्यो यत: स वशकारक:' ।।**

किञ्च– सर्वगुणसम्पन्नोऽपि भेदेन बध्यते, एवं सम्प्रधार्य तस्याभिमुखो भूत्वा गर्वादुन्त– कन्धर: ससम्भ्रममुवाच्– माम ! कथमत्र भवान् मृत्युमुखे प्रविष्ट:!। येन एष: गज: सिंहेन व्यापादित:। स च मामेतद्रक्षणे नियुज्य नद्यां स्नानार्थं गत:। तेन च गच्छता मम समादिष्टं– 'यदि कश्चिदिह व्याघ्र: समायाति तर्हि त्वया सुगुप्तम् ममाऽवेदनीयम्। येन वनमिदं मया निर्व्याघ्रं कर्तव्यम् । यत:– पूर्वं व्याघ्रेणैकेन मया व्यापादितो गज: शून्ये भक्षयित्वा उच्छिष्टतां नीत:। तद्दिनादारभ्य व्याघ्रान्प्रति प्रकुपितोऽस्मि।'

तत् श्रुत्वा व्याघ्र: सन्त्रस्त: तमाह– 'भो भागिनेय ! देहि मे प्राणदक्षिणाम्। त्वया तस्य अत्र चिराय आयातस्य अपि मदीया काऽपि वार्ता न आख्येया।' एवमभिधाय सत्वरं पलायाञ्चक्रे। अथ गते व्याघ्रे, तत्र कश्चित् द्वीपी समायात:। तमपि दृष्ट्वा असौ व्यचिन्तयत दृढदंष्ट्रोऽयं चित्रक:। तदस्य पार्श्वादस्य गजस्य यथा चर्मच्छेदो भवति, तथा करोमि। एवं निश्चित्य, तमप्युवाच– 'भो भगिनीसुत! किमिति चिरात् दृष्टोऽसि ? कथञ्च बुभुक्षित: इव लक्ष्यसे ? तदतिथिरसि मे। तदेष गज: सिंहेन हतस्तिष्ठति, अहञ्चास्य तदादिष्टो रक्षपाल:। परं– तथापि यावत्सिंहो: न समायाति, तावदस्य गजस्य मांसं भक्षयित्वा, तृप्तिं कृत्वा, द्रुततरं व्रज' ।

स आह– माम! यद्येवं तन्न कार्यं मे मांसाशनेन, यत:– 'जीवन्नरो भद्रशतानि पश्यति'। तद् अहमितोऽपयास्यामि। शृगाल: आह– भो अधीर! विस्रब्धो भूत्वा, भक्षय त्वम् । तस्य आगमनं दूरतोऽपि तवाहं निवेदयिष्यामि।'

तथाऽनुष्ठिते, द्वीपिना भिन्नां त्वचं विज्ञाय, जम्बुकेनाऽभिहितं– भो भगिनीसुत! गम्यताम् ।एष सिंह: समायाति।' तद् श्रुत्वा चित्रको दूरं प्रनष्ट:।

अथ यावदसौ तद्भेदकृतद्वारेण किञ्चिन्मांसं भक्षयति, तावदतिसंक्रुद्धोऽपर: शृगाल: समाययौ। अथ तमात्मतुल्यपराक्रमं दृष्ट्वैनं श्लोकमपठत्–

**उत्तमं प्रणिपातेन, शूरं भेदेन योजयेत्।**
**नीचमल्पप्रदानेन, समशक्तिं पराक्रमै: ।।**

(ततश्च) तदभिमुखकृतप्रयाण: स्वदंष्ट्राभिस्तं विदार्य, दिगन्तभाजं कृत्वा, स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे।

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **समासादितः** | – | प्राप्तः (प्राप्त किया) |
| **समन्तात्** | – | परितः (चारों ओर) |
| **भेत्तुम्** | – | भेदनं कर्तुम्, छेत्तुं वा |
| **इतश्चेतः** | – | यत्र-तत्र (इधर-उधर) |
| **समाययौ** | – | समागतः |
| **दृष्ट्वा** | – | अवलोक्य (देखकर) |
| **लागुडिकः** | – | प्रहरी (पहरेदार) |
| **बुभुक्षिताः** | – | क्षुधिताः (भूखे) |
| **व्यसनाभिभूताः** | – | दुःखपीडिताः |
| **साध्यः** | – | साधनीयः |
| **वशकारकः** | – | वशकारी |
| **बध्यते** | – | वशीक्रियते |
| **उवाच** | – | अवोचत् |
| **नियुज्य** | – | नियुक्तं कृत्वा |
| **व्यापादितः** | – | मारितः |
| **नीतः** | – | प्रापितः |
| **भागिनेयः** | – | भगिनीपुत्रः (बहिन का पुत्र) |
| **द्वीपीः** | – | चित्रकः (चीता) |
| **व्यचिन्तयत्** | – | शुशोच (विचार किया) |
| **पार्श्वात्** | – | निकटात् |
| **रक्षपालः** | – | प्रहरी |
| **विस्रब्धम्** | – | आश्वस्तः |
| **समायाति** | – | आगच्छति |

# अभ्यासः

## वस्तुनिष्ठात्मक-प्रश्नाः–

१. 'नीत्या स्वकार्यं साधनीयम्' पाठः समुद्धृतोऽस्ति ?

(क) पञ्चतन्त्रात् (ख) हितोपदेशात्

(ग) दशकुमारचरितात् (घ) कादम्बरीतः ( )

२. पञ्चतन्त्रस्य रचयिता वर्तते ?

(क) बाणभट्टः (ख) दण्डी

(ग) विष्णुशर्मा (घ) नारायणपण्डितः ( )

३. भो भगिनीसुत ! कथमतिचिरात् दृष्टोऽसि ? अत्र 'भगिनीसुत' शब्दः प्रयुक्तोऽस्ति–

(क) सिंहाय (ख) जम्बुकाय

(ग) चित्रकाय (घ) व्याघ्राय ( )

४. 'नाहमन्येन हतं सत्त्वं कदाचिदपि भक्षयामि'– इति कस्य कथनम् ?

(क) सिंहस्य (ख) चित्रकस्य

(ग) शृगालस्य (घ) व्याघ्रस्य ( )

## अतिलघूत्तरात्मक-प्रश्नाः–

१. वनप्रदेशे किम् नाम शृगालः वसति स्म ?

२. महाचतुरकः अरण्ये स्वयं कः प्राप्तः?

३. 'स्वामिन् ! त्वदीयोऽहं लागुडिकः स्थितः.....' इति कः कथयति?

४. सिंहे गते शृगालस्य समीपे कः समाययौ ?

५. गते व्याघ्रे तत्र कः समायातः ?

६. भो भागिनेय देहि में प्राणदक्षिणाम् इति कस्य कथनमस्ति ?

## लघूत्तरात्मक-प्रश्नाः–

१. पञ्चतन्त्रस्य रचयितुः परिचयो दीयताम् ?

२. पञ्चतन्त्रस्य किं वैशिष्ट्यम् ?

३. महाचतुरेण शृगालेन सिंहः कथम् अपवारितः ?

४. व्याघ्रं शृगालः किम् अकथयत् ?

५. शृगालेन चित्रकः कथं दूरीकृतः ?

## निबन्धात्मक-प्रश्नाः–

१. 'नीत्या स्वकार्यं साधनीयम्' कथानुसारेण शृगालस्य चरित्र-चित्रणं कुरुत ?

२. पञ्चतन्त्र ग्रन्थस्य परिचयं लिखत ?

३. उपायचतुष्टयस्य वर्णनं कुरुत ?

## व्याकरणात्मक-प्रश्नाः–

**( क ) अधोलिखितपदानां सन्धिविच्छेदं कृत्वा नामापि लेख्यम्-**

| पदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| इतश्चेतश्च | ............................ | ........................ |
| तस्याभिमुखो | ............................ | ........................ |
| वनेऽपि | ............................ | ........................ |
| निर्व्याघ्रम् | ............................ | ........................ |
| कश्चित् | ............................ | ........................ |
| व्यचिन्तयत् | ............................ | ........................ |
| पार्श्वादस्य | ............................ | ........................ |

**( ख ) अधोलिखितपदानां समासविग्रहं कृत्वा तस्य नामापि लेखनीयम्-**

| सामासिकपदम् | समासविग्रहः | समासनाम |
|---|---|---|
| संयोजितकरयुगलः | ................ | ................ |
| मृगमांसभक्ष्या | ................ | ................ |
| वशकारकः | ................ | ................ |
| सर्वगुणसम्पन्नः | ................ | ................ |
| उन्नतकन्धरा | ................ | ................ |
| अल्पप्रदानेन | ................ | ................ |
| भगिनीसुत | ................ | ................ |
| अश्रद्धेयम् | ................ | ................ |
| सानन्दम् | ................ | ................ |

**( ग ) अधोलिखितपदानां विभक्तिः वचनञ्च लिख्यताम्-**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| अरण्ये | ...................... | ........................... |

| | | |
|---|---|---|
| गर्वात् | ...................... | ........................... |
| सिंहेन | ...................... | ........................... |
| चित्रक: | ...................... | ........................... |
| भगिनीसुत ! | ...................... | ........................... |

**( घ ) अधोलिखितपदानां धातु: लकारा: पुरुष: वचनञ्च लेखनीय–**

| पदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| आसीत् | .......... | ........... | ........... | .......... |
| परिभ्रमति | .......... | ........... | ........... | .......... |
| उवाच | .......... | ........... | ........... | .......... |
| भक्षयतु | .......... | ........... | ........... | .......... |
| भविष्यति | .......... | ........... | ........... | .......... |
| देहि | .......... | ........... | ........... | .......... |
| सन्ति | .......... | ........... | ........... | .......... |

**( ङ ) निम्नलिखितेषु पदेषु प्रकृति: प्रत्ययश्च पृथक् लिख्यताम्–**

| पदम् | प्रकृति: | प्रत्यय: |
|---|---|---|
| भेत्तुम् | .......................... | .......................... |
| अभिभूता: | .......................... | .......................... |
| श्रुत्वा | .......................... | .......................... |
| तृप्तिम् | .......................... | .......................... |
| कार्यम् | .......................... | .......................... |

**( च ) अधोनिर्दिष्टान् पदान् आश्रित्य वाक्यानि रचयत् –**

| पदम् | वाक्यम् |
|---|---|
| भूत्वा | ............................................................................................ |
| प्रणिपातेन | ............................................................................................ |
| नीतिमार्गम् | ............................................................................................ |
| प्रयोक्तव्य: | ............................................................................................ |
| समायाति | ............................................................................................ |
| नियुज्य | ............................................................................................ |

❀ ❀ ❀

# द्वादशः पाठः
# मातृवन्दना-गीतिः

मरूभूमिरियं आधुनिक संस्कृतसाहित्यस्य रचनास्थली अस्ति। जयपुरनगरं तु 'अपराकाशी' अपि कथ्यते। डॉ. हरिरामआचार्यस्य जन्मः राजस्थानप्रान्ते 'स्वर्णनगरी' इति नाम्ना विख्याते जैसलमेरनगरे श्रीगणेशदत्त आचार्य महोदयस्य गृहे १९३६ तमे ख्रिष्टाब्दे अभवत्।

आचार्यमहोदयेन लघुकाशी इतिनाम्ना विख्यातम् 'जयपुरनगरम्' स्वकर्मक्षेत्रं अङ्गीकृतम्। राजस्थानविश्वविद्यालये 'प्रोफेसर', 'डीनफैकल्टी' चेतिपदम् अलंकुर्वन्, असंख्यान् छात्रान् शिक्षयन् संस्कुर्वन् च सुरभारतीम् आराधना कृता। भवता 'पूर्वशाकुन्तलम्, 'गाहा-सतसई', 'मधुच्छन्दा' आदिग्रन्थाः विरचिताः। तेन हिन्दीभाषायाम् कविता-संग्रहः, जैनागमानां, प्राकृत-ग्रन्थानां, गाथानाम् च काव्यानुवादः अपि कृतः। रङ्गमञ्चे प्रस्तुतिहेतु अनेकेषाम् नाटकानां रचनया, मञ्चनेन सह आचार्यमहोदयस्य चलचित्रे, आकाशवाण्यामपि विशिष्टः योगदानमस्ति। भवता राजस्थानप्रान्तस्य 'संस्कृतअकादमी' इति संस्थायाः अध्यक्षपदमपि अलंकृतम्।

अनेन 'राजस्थान-साहित्य-अकादमी' नाम्ना संस्थायाः सर्वोच्च 'मीरापुरस्कार' (१९७२ ई.), 'राजस्थानसंस्कृतअकादमी' संस्थायाः सर्वोच्चनाट्य पुरस्कारः (१९९८ ई.), 'मधुच्छन्दा' इति गीतिकाव्यस्य कृते 'माघपुरस्कारः' (२००१ ई.) अपि प्राप्तः। संस्कृतभाषायाः विस्ताराय, नवोन्मेषाय च राष्ट्रपतिपुरस्कारेण अपि सम्मानितः।

संस्कृतसाहित्ये गीतिकाव्य परम्परायाम् वैदिककालादेव सरसानां गीतिकाव्यानाम् रचना अजस्रास्ति। इमामेव परम्परां निर्वहन् डॉ. आचार्यः हृद्यं, भव्यं, सुश्राव्यं च गीतिकाव्यम् 'मधुच्छन्दा' इति रचितवान्। अस्मिन् काव्ये नवीनेषु गेय-छन्दसु रचिताः गीतिकाः सरसाः, सुमधुराः आह्लादकाश्च सन्ति। अनेन युगबोधपरकानां, भाव-प्रवणानां, प्रयोगधर्मीविषयाणाम् गीतिकानां न केवलं रचना कृता अपितु काव्यमञ्चेषु तासां पाठमपि कृतम्।

प्रस्तुतः पाठः मधुच्छन्दायां 'राष्ट्रिय' विषयान्तर्गते रचिताभ्यः गीतिकाभ्यः सङ्कलितः। अस्यां कविना मातृभूभारतेः वन्दनायाः आह्वानं कृतम्। मातृभूमेः स्वरूपाख्यानेन सह सुधिजनैः आचरणीया राष्ट्रियतायाः आख्यानं कृतम्। शुभाशंसनापि कृता यत् भारत-राष्ट्रं सुराष्ट्रं भवतु। सुशासनस्य लोकशासनस्य च स्थापना भवतु।

# मातृवन्दना-गीतिः

गीयतां गीयतां गीयताम् ,
अद्य मातृवन्दना मधुस्वरेण गीयताम्।
मातृभूरियं हि कर्मभूः पुराणमङ्गला।
सुविश्रुता तपोव्रता सुदर्शना सुवत्सला।।
अनादि-धर्म-मालिनी,
अनन्त-पुण्य-शालिनी।
समृद्धि-बुद्धि-शक्तिदा सदैव मुक्तश्रृङ्खला।।
चीयतां चीयतां चीयताम्,
भारतीयशो भृशं समस्त दिक्षु चीयताम्।।
स्वतन्त्रतामृतं सुपर्णकैः दिवः समाहृतम्।
हुतात्मभिः समर्पितं प्रभा-रतं सु-भारतम्।
न तत्र रक्तमण्डनम्,
भवेन्न शान्ति-खण्डनम्।
विपन्न रक्षणं सदैव शस्त्रिणां महाव्रतम्।
लीयतां लीयतां लीयताम्,
अन्धतामसी घृणा-निशा क्षणेन लीयताम्।।
भवेत् क्वचिन्न भ्रष्टता, न सच्चरित्र-दूषणम्।
मनुष्यता भवेत् समस्त-सम्प्रदाय-भूषणम्।।
विभिन्न-मार्ग-मण्डनाः
सुबन्धवः समे जनाः,
अनेकतासु चैकता हि संस्कृतेर्विभूषणम् ।।
पीयतां पीयतां पीयताम्,
बन्धु-भावना-सुधा-मुदा सदैव पीयताम्।।
न दीनलोकमोषणं न हीनभावपोषणम्।
न हिंसनं भवेत् क्वचिन्न वञ्चनं न शोषणम्।।

हितैषितैव वर्तताम्,
सुराष्ट्रकं प्रवर्धताम् ।
अकण्टकं नु भारतं भवेतभीति-काननम्।।
धीयतां धीयतां धीयताम्,
वीतकल्मषं हि लोकशासनं विधीयताम् ।।

❀ ❀ ❀

## शब्दार्थाः

| | | |
|---|---|---|
| **कर्मभूः** | – | कर्माणां भूः (कर्मभूमि) । |
| **पुराणमङ्गला** | – | पुरातना च मङ्गला च । |
| **सुविश्रुता** | – | बहुश्रुता, सुविख्याता । |
| **तपोव्रता** | – | तपो एव व्रतो यस्याः सा । |
| **सुदर्शना** | – | सुष्ठुदर्शना । |
| **सुवत्सला** | – | श्रेष्ठ-संततिसंयुक्ता । |
| **शक्तिदा** | – | शक्तिम् ददाति या सा । |
| **मुक्तशृङ्खला** | – | मुक्ताशृङ्खला यस्याः सा (स्वतन्त्रा) । |
| **चीयतां** | – | वृद्धिं प्राप्नोतु । |
| **भृशं** | – | बहु। |
| **सुपर्णकैः** | – | शोभनाः पक्षाः यस्य सः सुपर्णः तैः (गरुड़ पक्षी)। |
| **समाहृतम्** | – | सम्यक् रूपेण आहूतम् (सूर्य की किरणों द्वारा)। |
| **हुतात्मभिः** | – | हुता आत्मा यैः तैः (स्वतन्त्रतासेनानियों के द्वारा)। |
| **प्रभारतम्** | – | कान्तिमत्। |
| **रक्तमण्डनम्** | – | रक्तेन मण्डनम्। |
| **विपन्नरक्षणम्** | – | विपन्नानाम् किंवा दीनजनानाम् रक्षणम्। |
| **शस्त्रिणाम्** | – | शस्त्राणि धारयन्ति ये तेषां। |
| **लीयताम्** | – | लीनं भवतु। |
| **अन्धतामसी घृणा निशा** | – | घृणारूपीतामसी-अन्धकारेणसंयुक्ता निशा। |
| **दूषणम्** | – | दोषम्, क्षयम्। |
| **मण्डनाः** | – | सुशोभिताः। |